

# सोमज्योतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रैमासिकं वार्तापत्रम्

**Shree Somnath Sanskrit University**
Rajendra Bhuvan Road, Veraval - 362 266. Gir - Somnath (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417 Website : www.sssu.ac.in

शकाब्दः २०१९ | वैक्रमाब्दः २०७५ | अङ्कः १९ | जनवरी-मार्च २०१९

कुलपतिवाक्

## चित्तवातायनात् किञ्चित् ...



संसारे गतिरस्ति, प्रगतिरप्यस्ति। गतिर्गण्यर्ते, दुर्गतिः दुष्यते, सद्गतिरिष्यते, केवलं प्रगतिः स्तूयते। नियतिनियतया गत्या बालः किशोरो भवति, किशोरो युवा, युवा च वृद्धः। किन्तु प्रगत्यैव कश्चिद् युवा नरेन्द्रो विवेकानन्दो भवति, कश्चिद् रवीन्द्रनाथो विश्वकविर्भवति, कश्चिद् मदनमोहनमालवीयः महामना भवति, कश्चिच्च मोहनदासः महात्मा गान्धीति सम्माननमधिरोहति।

श्रीसोमनाथसंस्कृतविश्वविद्यालयः इतराः संस्था इव गतिमानस्ति, प्रगतिशीलोऽप्यस्ति। स्वगत्याऽत्र शास्त्राद्यध्ययनमध्यापनं च प्रसरति, परीक्षणमूल्याङ्कनादिविधयो विधीयन्ते, सामुद्रिकवातेरितानि तत्तद्वृक्षादिगत-पल्लवपुष्पादीनि विवृद्धिमश्नुवते। तत्समकालमेव मुहूर्तनिर्णयमाश्रित्य जनवरीमासे ज्योतिषकार्यशाला, फरबरीमासे एकादशपदवीदानसमारम्भेण सह दिवसत्रयात्मिका 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति विषयमाश्रित्य राष्ट्रियशोधसङ्गोष्ठी, हैडल्बर्ग, बुर्त्सबुर्ग इत्याख्याभ्यां जर्मनीदेशस्थाभ्यां द्वाभ्यां विश्वविद्यालयाभ्यां सह शैक्षिकाभिबन्धः (MoU), तदन्तर्गतं हैडल्बर्ग विश्वविद्यालयतः समागतेन डॉ. आनन्दमिश्रमहोदयेन मार्चमासे संस्कृतशिक्षणम् अङ्कीयमानविकीति विषयमाश्रित्य चतुर्दिवसीय-कार्यशालासञ्चालनम्, संस्कृतवाङ्मये नगररचनेति विषयमाश्रित्य सरदारपटेलविश्वविद्यालय-संस्कृतभारतीत्येताभ्यां सह संयुक्ततत्त्वावधानेन विद्यानगरे राष्ट्रियविचारगोष्ठी, जनवरीमासे Vibrant Gujarat-2019 इत्यत्र गान्धीनगरे विश्वविद्यालयस्योपलब्धीनां सपरिचयं भविष्यदृष्टेश्च सर्वेषां पुरतः सम्यक् संस्तुतिः, NCERT इत्येतेन सह संयुक्ततत्त्वावधानेन विश्वविद्यालयपरिसरे संस्कृतसाहित्ये शिक्षणविषयकसामग्रीसङ्ग्रहमुपलक्ष्य पञ्चदिवसीयकार्यशाला, जूनागढ-गीरसोमनाथेति मण्डलद्वयस्य विद्यालयानां संस्कृतशिक्षकसमुदायस्य एकदिवसात्मकः संस्कृताध्ययनविषयकध्यातव्यविषयविमर्शः इत्येतानि कतिपयप्रगतिलक्षितानि शैक्षणिककार्याणि समनुष्ठितानीति एतदर्थं विश्वविद्यालयस्य सर्वेऽपि छात्राध्यापक-कर्मचारि-पदाधिकारिणः भूयो भूयः साधुवादैः पुरस्क्रियन्ते। एतैः सह चतुर्णां पुस्तकानामपि प्रकाशन-सह-लोकार्पणमपि सञ्जातमिति परमहर्षस्य विषयोऽयं वर्तते।

कश्चित् फलदायी वृक्षः समकालं जनान् फलैः पोषयति तथा च छायया तोषयति। एवमेव अस्माकं विश्वविद्यालयः छात्राणां सर्वतोभावेन अभ्युदयाधिगत्यर्थं यथा यतमानः स्यात्तथैव छात्रेषु नित्यसन्ध्यावन्दनादिभिः काव्यशास्त्रगतोपयोगिविषयाणां सहजबोधैः योगाभ्यासेन शरीरस्य चित्रस्य च मलापसारणद्वारा विशुद्धचिन्तनोदयेन च एष विश्वविद्यालयः वृक्षच्छायातुल्यं सन्तोषं शीतलतां च वितनुत इति महतः सन्तोषस्यायं विषयः।

अग्रे अग्रे वर्धेमहि इत्येतदर्थमानुकूल्यं सम्पादयद्भिः गतिमद्भिरस्माभिः समकालं सर्वेषामपि स्थावरजङ्गमानां हितं साधनीयमिति स्वस्य प्रगतिशीलत्वं सततं सम्पादनीयमित्येतदर्थं भगवतः श्रीसोमनाथस्य नित्यानुग्रहं संप्रार्थयामहे।

**गोपबन्धुमिश्रः**
कुलपतिः



Chief Editor
**Prof. Gopabandhu Mishra**

Publisher
**Dr. Dashrath Jadav**

Managing Editor
**Ravindra S. Kale**

Editor
**Dr. Janakisharan Acharya**

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** (Quarterly Newsletter of Shree Somnath Sanskrit University) from affiliated colleges, recognized study centers & approved research centers of Shree Somnath Sanskrit University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

**Address:**
**The Editor**
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist. Gir-Somnath, Gujarat–362 266.
(O) 02876-244532

**E-mail:** editor.somjyoti@gmail.com

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य जालपुटेऽपि
''सोमज्योतिः'' द्रष्टुं शक्यते -
www.sssu.ac.in
SSSU Library Site - tiny.cc/r8s74y

Statement about the ownership and other particulars about newspapers
**SOMAJYOTIḤ**
**FORM IV**
(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

1. Place of the Publication : Shree Somnath Sanskrit University Veraval, Gujarat – 362266
2. Periodicity of its Publication : Quarterly
3. Printer's Name : H.K. Offset
   Nationality : Indian
   Address : 1st Floor, Vraj Plaza, Jain Derasar Road, Veraval, Gujarat-362266
4. Publisher's Name : The Registrar
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
5. Editor's Name : Prof. Gopabandhu Mishra
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266

I, Dr. Dashrath Jadav, Registrar (I/c), Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

# कुलपतेः दैनन्दिनी

| | |
|---|---|
| 01-01-19 | Launching Annual Diary-2019 with Calendar and Planner. |
| 03-01-19 | Presided over the convocation committee & organising committee of National seminar (05-07 February, 2019) in the Campus. |
| 05-01-19 | Presided over the Valedictory of the workshop on Jyotish (01-05 January, 2019) in the Campus. |
| 07-01-19 | Presided over the meeting of Construction work Committee. |
| 08-01-19 | Presided over the meeting of E.C. & A.C. of SSSU in the Campus. |
| 11-01-19 | Meeting with Hon. Principal Secretary, Sachivalaya, Gandhinagar on pending Issues of University. |
| 12-01-19 | Attended the launching of Book “Corporate Monk” written by Smt. Anju Sharma, Principal Secretary, Higher Education, Sachivalaya, Gandhinagar. |
| 14-01-19 | Shared the dias with Sri Sadguru Jaggi Vasudevji in Somnath. |
| 15-01-19 | Signed two International MoU with (i) University of Heidelberg, Germany and (ii) University of Wurzburg, Germany. |
| 16-01-19 | Chief Guest in the Annual Function of Sri Babadeshwara Sanskrit Mahavidhyalaya, Sri Sandipani Vidyaniketan, Porbandar. |
| 17-01-19 | Remained present in Inauguration function of Vibrant Gujarat-2019 in Gandhinagar with staff of SSSU. |
| 23-01-19 | Meeting with Sri Gopalkrishna Bhatta, Junagadh in SSSU Campus and the name of Prof. Vasant Kumar Bhatt was finalised to be facilited in the Annual Convocation 2019. |
| 25-01-19 | Presided over the meeting on National Voter's day in the SSSU Campus. |
| 26-01-19 | Hosted the National Flag Day in the Campus. |
| 29-01-19 | Performed Yajna in the Yajnashala in the Campus. |
| 05-02-19 | (I) Hosted the 11th Annual Convocation in the Campus, Hon'ble Governor Shri O.P. Kohli was the President, Prof. Umashankar Sharma "Rishi" as Sarasvata Atithi, Prof. Rajaram Shukla, Chief Guest.<br>(ii) Presided over the Inaugural Session of the National Seminar on भारतीयदर्शनेषु सैद्धान्तिकपक्षाः held on 05-07 February, 2019 in SSSU Campus. |
| 07-02-19 | Presided over the valedictory of the National Seminar & Kavi Sammelan. |
| 08-02-19 | Presided over the meeting of Hostel Committee. |
| 10-02-19 | Worshipped Mata Sarasvati on Vasanta Panchami. |
| 12-02-19 | Meeting with Hon. Principal Secretary about pending Issues of the University |
| 13-02-19 | Attended the meeting of Hon. Commissioner of Higher Education, Gujarat about Repairing / Renovation work, held at KCG, Ahmedabad. |
| 17-02-19 | Nominated as Member of Selection Committee Meeting for the post of Principal in Calicut Adarsh Sanskrit Mahavidhyalaya, Kozikode, Kerala and attended the interview conducted at Rashtriya Sanskrit Sansthan, Guruvayar Campus, Puranattukara, Kerala. |
| 19-02-19 | Meeting with Hon. Education Minister, Sachivalaya, Gandhinagar about pending Issues of the University. |
| 20 to 22-02-19 | Invited to Conduct a Workshop on “Spoken Sanskrit” organized jointly by Heidelberg University and Wurzburg University, Germany at Varanasi. |
| 25-02-19 | (I) Presided over the Principals' Seminar in Campus.<br>(ii) Presided over the NCERT Workshop (25-02-19 to 01-03-19) in the SSSU Campus. |
| 01-03-19 | Presided over the valedictory of NCERT workshop. |
| 02-03-19 | Examiner of PhD student’s viva voice exam held at Lucknow University, Lucknow. |
| 04-03-19 | Chief guest in the National Seminar on Madhya Mimansa in Jnana Pravah, Varanasi. |
| 05-03-19 | Visited at Sachivalaya, Gandhinagar about pending Issues of the University. |
| 06 to 07-03-19 | Presided over the "Sanskrit Sahitye Nagar Rachna" a Two days seminar Innogration ceremony jointly organised by Shree Somnath Sanskrit University, Veraval, Sanskrit Bharati and S P University at S P University, Vallabh Vidyanagar. |
| 09-03-19 | Presided over the meeting with a delegation of Delhi Public Library, Sanskriti Mantralaya New Delhi under the “Mahatma Gandhi Ko Jano - Gujarat Padyatra programme” in the SSSU Campus. |
| 11-03-19 | Presided over the Inaugural session of the workshop on (11-14 March, 2019) “Sanskrit Learning of Digital Humanities: A New perspective” conducted by Dr. Anand Mishra, Heidelberg University under the MoU of SSSU and Heidelberg University, Germany. |
| 14-03-19 | (I) Presided over the valedictory of the workshop.<br>(ii) Video Conference with Mr. Dalip, Heidelberg University, Germany along with Dr. Anand Mishra, Dr. Dipesh Katira, Sri Ravindra Kale and Sri Haresh Kher. |
| 23 to 24-03-19 | Attended a Meeting as a Committee Member of the अनौपचारिकसंस्कृतशिक्षणकेन्द्र-केन्द्रीयसमितिः held at Rashtriya Sanskrit Santhan, New Delhi. |

## विश्वविद्यालयपरिसरे समायोजिता पञ्चदिवसात्मिका ज्योतिषकार्यशाला



ज्योतिषकार्यशालायाः उद्घाटनावसरे मञ्चस्थाः महानुभावाः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ०१ तः ०५ जनवरी २०१९ यावत् विश्वविद्यालयपरिसरस्य प्रभासज्योतिः इति शैक्षणिकभवने 'पञ्चाङ्गपरिचयः मुहूर्त्तविचारश्च' इति विषयं क्रोडीकृत्य अभिनवैका कार्यशाला आयोजिता आसीत्। अस्यां कार्यशालायां विश्वविद्यालयात् विश्वविद्यालयसंलग्न-महाविद्यालयेभ्यश्च प्रायः पञ्चत्रिंशदधिकाः ज्योतिषशास्त्राध्येतारः विद्यार्थिनः भागमग्रहीषुः। अस्याः कार्यशालायाः उद्घाटनसत्रं ०१.०१.२०१९ दिनाङ्के जातं यत्र विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः, काशीहिन्दू-विश्वविद्यालयस्य ज्योतिषविभागाध्यक्षः प्रो. विनयकुमारपाण्डेयः, श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, कार्यकरि-कुलसचिवः डॉ. दशरथजादवः, वेदवेदाङ्गसङ्कायाध्यक्षः कार्यशाला-मुख्यसंयोजकश्च डॉ. रमेशचन्द्रशुक्लः, कार्यशालासंयोजकः श्रीनित्यानन्दओझा, विश्वविद्यालयस्य प्राध्यापकाः छात्राश्च समुपातिष्ठन्। प्रो. विनयकुमारपाण्डेयः उद्घाटनावसरे प्रासङ्गिकवक्तव्यनेन उपस्थितजनान् उदबोधयत्। कार्यशालायाम् आगतानां विद्यार्थिनां भोजनावासव्यवस्था विश्वविद्यालयपक्षतः निश्शुल्करूपेण उपकल्पिता आसीत्। अस्यां पञ्चदिवसात्मिकायां कार्यशालायां षड्भिः दैवज्ञैः निर्धारितविषयेषु नितरामध्यापनकर्म अक्रियत। अस्याः कार्यशालायाः समापनसमारोहः ०५.०१.२०१९ दिनाङ्के सम्पन्नः यत्र राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य ज्यौतिषविभागाध्यक्षः प्रो. मदनमोहनपाठकः मुख्यातिथिरूपेण उपस्थितः आसीत्। अनया कार्यशालया दैवज्ञानां छात्राणां महान् लाभः जातः।

## श्रीसोमनाथसंस्कृतविश्वविद्यालये छात्राभिभावकसम्मेलनम्


छात्राभिभावकसम्मेलनस्य किञ्चन दृश्यम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन अभिभावकानां विश्वविद्यालयेन सह परिचयं सुदृढं कर्तुं समये समये छात्र-अभिभावकसङ्गोष्ठ्याः समायोजनं क्रियते। ऐषमः विश्वविद्यालयस्य एकादशपदवीदानसमारोहोपलक्ष्ये ०५.०२.२०१९ दिनाङ्के छात्राणाम् अभिभावकाः सम्बन्धिनश्च समाहूताश्चासन्। येन विश्वविद्यालयस्य गरिममयोऽयं कार्यक्रमः कथं भवति तेन समं पदवीदानसमारम्भः अर्थात् किम्? तज्ज्ञात्वा स्वपुत्राय प्रेरणामपि दद्युः। अनेन सह अस्याः अभिभावकसङ्गोष्ठ्याः एतदपि प्रयोजनं वर्तते यत् अग्रिमवर्षाय ते अभिभावकाः अपि विश्वविद्यालयस्य प्रचारप्रसारं कुर्युः। स्वविस्तारे स्वकुटुम्बे स्वसमाजे ते छात्रान् विश्वविद्यालयं प्रेषयेयुः। अस्मिन् वर्षे आहत्य दशाधिकच्छात्राणां परिवारसदस्याः समागताः आसन्।

## राष्ट्रियमतदातृदिवसः समनुष्ठितः विश्वविद्यालयपरिसरे



राष्ट्रियमतदातृदिवसस्य समायोजनावसरे मञ्चस्थाः महानुभावाः

२५.०१.२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे गीरसोमनाथजनपदस्तरीयः राष्ट्रियमतदातृदिवसः समाचरितः। अत्र कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथजादवः, अतिरिक्तजनपदसमाहर्ता श्रीमान् मोदी महोदयः, प्रान्ताधिकारी श्रीनितिन साङ्गवानः, गीरसोमनाथ-जनपदस्य निर्वाचनाधिकारी प्रजापतिवर्यः, प्रशासनाधिकारिणः, अधिकारिणः, कर्मचारिणश्च समुपातिष्ठन्। अस्मिन् सन्दर्भे सी.पी.चौकसी महाविद्यालयच्छात्रेभ्यः मतदातृजागरणाय नाटकमेकम् अनाटि। कार्यक्रमे उपस्थितैः महानुभावैः उत्तमकार्यकरणाय 'बेस्ट सेक्टर ऑफिसर्' किञ्च 'बेस्ट बी.एल.ओ.' प्राप्तवतां महानुभावानां सन्मानं व्यधायि। कार्यक्रमस्यास्य सञ्चालनं डॉ. डी. एम्. मोकरिया महोदयः अकरोत्।

## राष्ट्रिय-सेवा-योजनाविभागस्य परामर्शसमितेः सम्मेलनम्



१२.०३.२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयेन विश्वविद्यालयस्तरीयस्य राष्ट्रिय-सेवा-योजनाविभागस्य परामर्शसमितेः सम्मेलनस्य आयोजनम् कुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य आध्यक्ष्ये अकारि। अस्मिन् सम्मेलने राष्ट्रियसेवायोजनायाः गुजरातविभागप्रमुखः डॉ. कमलकुमार कर, कुलसचिवः डॉ. दशरथ जादवः, अस्याः समितेः सदस्याश्च समुपातिष्ठन्। श्रीसोमनाथसंस्कृतविश्वविद्यालये राष्ट्रियसेवायोजनायाः प्रचलितानां प्रकल्पानां समीक्षां विधाय विश्वविद्यालये इतोऽपि अधिकाः छात्राः राष्ट्रियसेवायोजनायां भागं गृह्णीयुः, किञ्च अस्याः राष्ट्रियसेवायोजनायाः लाभं सर्वे छात्राः यथा प्राप्नुयुः इति विषये मान्यकुलपतिना समितिसदस्यैश्च मार्गदर्शनं प्रदत्तम् इति राष्ट्रियसेवायोजनासमन्वयकः डॉ. जयेशमुंगरा असूचयत्।

## श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे सोत्साहं समाचरितः एकादशः पदवीदानसमारम्भः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एकादशः पदवीदानसमारम्भः ०५.०२.२०१९ तमे दिनाङ्के पूर्वाह्णे एकादशवादने विश्वविद्यालयपरिसरे माननीयराज्यपालमहोदयस्य श्रीमतः ओ.पी.कोहलीवर्यस्य आध्यक्षे सगौरवं सोत्साहश्च समाचरितः, यत्र कुलाधिपतिमहोदयस्य सङ्कल्पमन्त्रैः प्रतिज्ञावचनैश्च छात्राः स्वजीवने उन्नतिप्राप्तेः मार्गदर्शनं प्रापुः। अस्मिन् पदवीदानसमारोहे कुलाधिपतिना स्वर्णादिपदकप्राप्तवद्भ्यः, ८७० पदवीप्राप्तवद्भ्यश्च अभिनन्दवंचासि पठितानि। एतस्मिन् सन्दर्भे माननीयकुलाधिपतिना विश्वविद्यालयद्वारा आयोज्यमाना त्रिदिवसीयाखिलभारतीया दर्शनशास्त्रीयराष्ट्रियसङ्गोष्ठी समुद्घाटि किञ्च मञ्चस्थमहानुभावैः सह विश्वविद्यालयेन प्रकाशितानां चतुर्णां पुस्तकानां विमोचनमपि अकारि। एकादशपदवीदानसमारोहे सारस्वतातिथिरूपेण पटनाविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः प्रो. उमाशङ्करशर्ममहोदयः 'ऋषिः', विशिष्टातिथिरूपेण सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. राजारामशुक्लः, श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः, कार्यकारिकुलसचिवः डॉ. दशरथजादवः, 'जिलापञ्चायत'प्रमुखवर्या श्रीमती मञ्जुलाबेनसुयाणी, जनपदविकासाधिकारी श्रीधर्मेन्द्रसिंह रहेबर, श्रीलखमभाई भैंसला, मामलतदारपदवाच्यः श्रीदेवकुमार आम्बलीया, विश्वविद्यालयस्य कार्यपरिषदः विद्यापरिषदश्च सभ्याः, विभिन्नमहाविद्यालयेभ्यः आगताः प्राचार्याः, स्वर्णपदकप्रेप्सवः विद्यार्थिनः, सम्पादितशोधकार्याः विद्यावारिधिपदवीप्रेप्सवः शोधार्थिनः, वेरावलस्थाः नागराः, विश्वविद्यालयस्य प्राध्यापकाः, अधिकारिणः, कर्मचारिणः छात्राश्च समुपातिष्ठन्।

महामहिमराज्यपालमहोदयः भारतीयसंस्कृतेः संस्कृतस्य च श्रेष्ठरूपेण प्रचारप्रसारार्थं श्रीसोमनाथ-संस्कृतविश्वविद्यालयम् अभ्यनन्दीत्। वेदज्योतिषव्याकरणदर्शनसाहित्यादिविषयेषु उत्कृष्टसंशोधनाय प्राशंसीत्। वायब्रण्ट-गुजरात-२०१९ अन्तर्गते जर्मनदेशस्य द्वाभ्यां विश्वविद्यालयाभ्यां सह अन्ताराष्ट्रियशैक्षिकाभिबन्धनं (इण्टरनेशनल-एम्.ओ.यू.) कृत्वा विश्वविद्यालयं वैश्विकफलके प्रतिष्ठापयितुं माननीयकुलपतिं प्रो. गोपबन्धुमिश्रमहोदयं प्राशंसीत् किञ्च अवादीत् यत् एतत् गुजरातस्य कृतेऽपि गौरवमस्ति। कुलाधिपतिमहोदयः अनेनैव एकादशपदवीदानसमारम्भेण समम् आयोजितायाः राष्ट्रियदर्शनसङ्गोष्ठ्याः सफलतायाः कृतेऽपि अन्तःप्रेरणाम् अभिव्याञ्जीत्। अस्मिन् पदवीदानसमारम्भे त्रयोदशस्वर्णपदकानि, चत्वारि रजतपदकानि, नव नाणकपुरस्काराः विश्वविद्यालयेन विविधदातॄणां संस्थानां च सहयोगेन विद्यार्थिभ्यः प्रदत्ताः। गोपालकृष्णन्यासस्य सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयः व्याकरणक्षेत्रे विशिष्टकार्यार्थं गुजरातविश्वविद्यालयस्य भाषाभवनाध्यक्षचरं प्रो. वसन्तकुमारभट्टमहोदयं किञ्च विश्वविद्यालये श्रेष्ठसेवार्थं श्रीभीमभाई गळचरमहोदयं सम्मानपत्रेण सभाजयत्।

एकादशपदवीदानरम्भस्य आरम्भः वैदिकपरम्परानुगुणं दीपप्राकट्येन समं शङ्खध्वनिसमन्वितैः वैदिकमन्त्रैः जातः। तदनु सर्वैः उत्थाय विश्वविद्यालयस्य कुलगीतं श्रुतम्। माननीयकुलपतिना प्रो. गोपबन्धुमिश्रमहोदयेन सर्वेषां मञ्चस्थमहानुभावानां परिचयपुरस्सरं स्वागतभाषणं व्यधायि। मान्यकुलपतिः विश्वविद्यालयेन सम्पादितानां कार्याणां परिचयं सर्वेभ्यः कारयित्वा सर्वकारप्रदत्तं सहयोगम् उल्लिलेख। स्वकीयसम्बोधने माननीयराज्यपालमहोदयः अवादीत् यत् वर्तमानसमस्यानां निवारणं संस्कृतभाषायां वर्तते। संस्कृतभाषायां साहित्यधर्मनीतिगणितविज्ञानचिकित्साज्योतिषदर्शनादिविषयाणां तत्त्वानि निहितानि वर्तन्ते। अस्यां भाषायां नूतनपदानां सृजनशक्तिर्विद्यते। साम्प्रतं वैज्ञानिके युगेऽपि इयं भाषा अग्रे वर्धमानास्ति। इयं भाषा अस्मान् स्वसंस्कृत्या सह बध्नाति। विशिष्टातिथिः प्रो. राजारामशुक्लः अभाणीत् यत् बहूनां जन्मनाम् अनन्तरम् इदं पवित्रं मानवजीवनं प्राप्यते। अतः अस्मिन् जीवने अस्माभिः सत्कर्माणि आचरणीयानि। सारस्वतातिथिः प्रो. उमाशङ्करशर्मा 'ऋषिः' सर्वेभ्यः स्नातकेभ्यः 'माता भूमिः पुत्रोऽहं पृथिव्याः' इति वैदिकमन्त्रस्य रहस्यं समुदघाटयत्। अस्य एकादशपदवीदानसमारम्भसमारोहस्य सम्पूर्तिः राष्ट्रगानेन सह सम्पन्ना।


पदवीदानसमारम्भे यज्ञाचरणरताः कुलपतिवर्याः महानुभावाश्च



महानुभावैः पुस्तकलोकार्पणस्य किञ्चन दृश्यम्



पदवीदानसमारम्भे सारस्वतातिथिरूपेण भाषमाणाः प्रो. उमाशङ्करशर्मवर्याः 'ऋषिः'


स्वागतभाषणं विदधानः कुलपतिः प्रो. गोपबन्धुमिश्रः



एकादशे पदवीदानसमारोहे दीक्षान्तभाषणं विदधानाः कुलाधिपतयः राज्यपालाश्च श्रीओम्प्रकाशकोहलीवर्याः


पदवीदानसमारम्भे समुपस्थिताः महानुभावाः छात्राश्च

एकादशपदवीदानसमारम्भे लोकार्पितानां विश्वविद्यालयपुस्तकानां विवरणम् -

| क्रमः | ग्रन्थनाम | सम्पादको लेखकः अनुवादको वा |
|---|---|---|
| १. | वैयाकरणसिद्धान्तभूषणम् (भागः-२) | सम्पादकः - प्रो. के.वी. रामकृष्णमाचार्युलु |
| २. | Error Analysis of Modern Sanskrit Literature | सम्पादकः - डो. दीपेश कतिरा |
| ३. | जगतीविंशतिका | रचयिता - डॉ. नरेन्द्रकुमार पण्ड्या |
| ४. | सोमज्योतिः (अङ्कौ-१७-१८) | सम्पादकः - डॉ. जानकीशरण आचार्यः |

## एकादशपदवीदानसमारम्भे स्वर्णादिपदकप्राप्तवतां छात्राणां विवरणम् -

**All over Toppers detail for April-2018 Examination**

| | | | | |
|---|---|---|---|---|
| **T.Y.B.A. (Shastri)** | | | | |
| 1 | Jani Ravi Devshankarbhai | 89.23 | Navya Vyakran | DSM, Chharodi |
| 2 | Sadhu Niranjandas | 88.38 | S. Vedanta (J) | DSM, Chharodi |
| **M.A. Part-2 (Acharya)** | | | | |
| 1 | Sadhu Mangalvardhandas | 91.46 | S. Vedanta (S) | BAPS SSM, Sarangpur |
| 2 | Sadhu Brahmamanandas | 89.96 | S. Vedanta (S) | BAPS SSM, Sarangpur |
| **B.ed. (Shikshashastri)** | | | | |
| 1 | Purohit Mehul Natubhai | 92.94 | - | SBVT (B.Ed.) College,Sola |
| 2 | Hariyani Mayur Mahendrabhai | 91.25 | - | SBVT (B.Ed.) College,Sola |
| **P.G.D.C.A.** | | | | |
| 1 | Daki Ankita Gopalbhai | 82.58 | - | M.N. K. & A.K.S. PGDCA Study Center, Mangrol |
| 2 | Bharda Subhash Bhimabhai | 82.00 | - | M.N. K. & A.K.S. PGDCA Study Center, Mangrol |

**Subject wise Toppers List for April-2018 - Acharya (M.A.)**

| SN | Subject | Name | Per. | Institution |
|---|---|---|---|---|
| 1 | Falit Jyotish | Joshi Bhavik | 75.33 | Department of P.G., SSSU, Veraval |
| 1 | Navya Vyakrana | Thakar Rajeshkumar | 85.50 | VSM, Sola |
| 1 | Puranetihas | Sadhu Harinandandas | 75.79 | SMSM, Magod |
| 1 | Sahitya | Gamit Manishaben | 76.08 | Department of P.G., SSSU, Veraval |
| 1 | Ved | Rahulkumar Jha | 83.54 | Department of P.G., SSSU, Veraval |
| 1 | Vastushastra | Rathod Bhumika | 70.88 | N.S. Patel Arts College, Anand |
| 1 | Yoga | Vagh Vaishaliben | 86.10 | Department of P.G., SSSU, Veraval |
| 1 | Dharmashastra | Pal Jaydeep R. | 76.71 | DSM, Chharodi |
| 1 | Navya Nyaya | Arunkumar Pandey | 85.83 | Department of P.G., SSSU, Veraval |
| 1 | Ramanuj Vedanta | Bhatt Tejas Rajubhai | 74.75 | DSM, Chharodi |
| 1 | S. Vedanta (J) | Swami Anand Vallabhdas | 63.46 | SSSM, Jetalpur |
| 1 | S. Vedanta (S) | Sadhu Mangalvardhandas | 91.46 | BAPS SSM, Sarangpur |

**Subject wise Toppers List for April-2018 - Shastri (B.A.)**

| SN | Subject | Name | Per. | Institution |
|---|---|---|---|---|
| 1 | Falit Jyotish | Nareshkumar Bhawarlal | 72.83 | Sanskrit College, Veraval |
| 1 | Navya Nyaya | Rajyaguru Jaydev | 79.79 | DSM, Chharodi |
| 1 | Navya Vyakran | Jani Ravi | 89.23 | DSM, Chharodi |
| 1 | Puranetihas | Dave Gautam Chimanlal | 65.71 | Sanskrit College, Veraval |
| 1 | Sahitya | Purohit Sagarkumar | 78.42 | SSSBSVV, Samkhiyali |
| 1 | Ved | Bogayata Hitesh Shantilal | 72.10 | SRSM, Ahmedabad |
| 1 | S. Vedanta (J) | Sadhu Niranjandas | 88.38 | DSM, Chharodi |
| 1 | S. Vedanta (s) | Ajmera Akshay Atulbhai | 86.13 | BAPS SSM, Sarangpur |
| 1 | Dharmashastra | Mandir Kalpeshkumar | 79.13 | VSM, Ahmedabad |



प्रो. वसन्तकुमारभट्टवर्यं सम्मानयन्तः कुलाधिपतयः श्रीओम्प्रकाशकोहलीवर्याः इतरे च मञ्चस्थाः महानुभावाः



श्रीभीमाभाई गळचरवर्यस्य सम्माननस्य किञ्चन दृश्यम्













## समायोजिता 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति अखिलभारतीया त्रिदिवसीया दर्शनसङ्गोष्ठी




दर्शनसङ्गोष्ठ्यां प्रो. श्रीकिशोरमिश्रमहाभागाः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन एकादशपदवीदानसमारम्भेण समम् एका त्रिदिवसीया अखिलभारतीया दर्शनसङ्गोष्ठी समायोजिता आसीत्। इयं सङ्गोष्ठी ०५.०२.२०१९ दिनाङ्के अस्य विश्वविद्यालयस्य कुलाधिपतिवर्याणां गुजरातराज्यस्य राज्यपालमहोदयानां च श्रीमतां ओम्प्रकाशकोहलीहर्याणां किञ्च कुलपतिवर्याणां श्रीमतां प्रो. गोपबन्धुमिश्रवर्याणां उपस्थितौ समारब्धा। ०५.०२.२०१९ दिनाङ्के पूर्वाह्णे राज्यपालमहोदयेन अस्याः सङ्गोष्ठ्याः उद्घाटनं कृतम्। तदनु अपराह्णे २.३० वादने अस्याः प्रथमं विशिष्टं सत्रं प्रावर्तत। अस्यां सङ्गोष्ठ्याम् आहत्य अष्टौ सत्राणि आसन् यत्र विशिष्टव्याख्यानस्य सत्रद्वयं, शोधपत्रवाचनस्य सत्रषट्कं चासीत्। प्रत्येकमपि सत्रे अध्यक्षः, सञ्चालकः, संवाददाता चेति व्यवस्था कल्पिता आसीत्। संवाददात्रा प्रत्येकमपि सत्रे प्रतिपादितानां विषयाणां सङ्क्षेपेण वृत्तकथनमकारि। अस्यां सङ्गोष्ठ्यां प्रायः पञ्चाशदधिकाः विपश्चिदपश्चिमाः विद्वांसः भागमगृह्णन्। 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति विषयं केन्द्रीकृत्य प्रवृत्तायाम् अस्यां सङ्गोष्ठ्यां पटनाविश्वविद्यालये संस्कृतविभागाध्यक्षचराः प्रो. उमाशङ्करशर्माणः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. राजारामशुक्लः, काशीहिन्दूविश्वविद्यालयस्य कलासङ्कायाध्यक्षः प्रो. श्रीकिशोरमिश्रः, उत्कलविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः प्रो. गोपालकृष्णदाशः, गुजरात-विश्वविद्यालयस्य भाषाभवनाध्यक्षचरः प्रो. वसन्तकुमारभट्टः, काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्म-विज्ञानसङ्कायाध्यक्षचरः प्रो. कृष्णकान्तशर्मा इतरे च विद्वांसः उपस्थाय दर्शनशास्त्रेषु निहितानां गूढतत्त्वानां सूक्ष्मेक्षिकया विश्लेषणं विधाय स्वविषयान् सरलतया प्रतिपादितवन्तः। सङ्गोष्ठ्याः अङ्गतया ०५.०२.२०१९ दिनाङ्के सायं सांस्कृतिकार्यक्रमस्य आयोजनम् अभूत् यत्र नृत्य-गीत-नाटकादिकार्यक्रमाः समायोजिताः।




कविसम्मेलनस्य किञ्चन दृश्यम्




वाक्यार्थं प्रस्तुवन्तौ पण्ड्यारिधम-जोषीध्रुविनौ

सङ्गोष्ठ्याः द्वितीये दिने सायं परम्परानुगतशैलीमाश्रित्य शास्त्रार्थविचारः प्रवृत्तः यत्र छात्रैः पूर्वपक्षसिद्धान्तपक्षरीत्या शास्त्रार्थः प्रास्तावि। तत्र प्रथमः शास्त्रार्थविचारः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य दर्शनविभागस्य छात्राभ्यां जोशीध्रुविन-पण्ड्यारिधमाभ्यां 'जिज्ञासाधिकरणम्' इति विषयमवलम्ब्य प्रस्तुतः। द्वितीयशास्त्रार्थविचारश्च विश्वविद्यालयसंलग्नस्य सारङ्गपुररस्थस्य बी.ए.पी.एस.स्वामिनारायणसंस्कृतमहाविद्यालयस्य छात्राभ्यां अक्षरसागराभ्यां स्वामिनारायण-सिद्धान्तानुगुणं 'जिज्ञासाधिकरणम्' इति विषयमादाय प्रस्तुतः। ०७.०२.२०१९ दिनाङ्के अस्याः सङ्गोष्ठ्याः अङ्गतया एकं कविसम्मेलनमपि आयोजितं यत्र विविधप्रान्तेभ्यः गुजरातराज्याच्च समागतैः कविवरैः स्वरचितकाव्यपाठः प्रस्तुतः। इत्थम् अस्यां त्रिदिवसात्मिकायाम् अखिलभारतीयदर्शनसङ्गोष्ठ्यां बहुषु विषयेषु आस्तिकनास्तिकव्यावहारिकसामाजिकेत्यादिविषयेषु गभीरतया संवादः जातः। शोधपत्राणां प्रस्तुतिसमये तद्विषयिणी जिज्ञासा, तन्निवारणादिकमपि सुष्ठु सम्पन्नम्।




समापनसमारोहे भाषमाणः प्रो. गोपबन्धुमिश्रवर्यः

अस्याः सङ्गोष्ठ्याः समापनसमारोहः ०७.०२.२०१९ दिनाङ्के अपराह्णे ३.३० वादने समजायत। यत्र सभाध्यक्षरूपेण विश्वविद्यालयस्य कुलपतिः आचार्यः गोपबन्धुमिश्रमहाभागः, मुख्यातिथिः महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य सदस्यसचिवचरः प्रो. श्रीकिशोरमिश्रः, सारस्वतातिथिरूपेण उत्कलविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः आचार्यः गोपालकृष्णदाशः, विश्वविद्यालयस्य कार्यकारिकुलसचिवः डॉ. दशरथजादवः, विश्वविद्यालयस्य सर्वेऽपि प्राध्यापकाः, कर्मचारिणः अन्तेवासिनश्च समुपातिष्ठन्। अस्य समापनसत्रस्य समग्रं सञ्चालनं डॉ. जानकीशरण आचार्यः अकरोत्। अस्याः दर्शनसङ्गोष्ठ्याः संयोजिकारूपेण डॉ. उमा महेश्वरी कार्यमकरोत्। इत्थम् इयं सङ्गोष्ठी 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति स्वविषये साफल्यं प्राप्नोत्।




दर्शनसङ्गोष्ठ्याः सांस्कृतिककार्यक्रमे नृत्यगीतनाटकादिप्रस्तुवद्भिः छात्रैः सह कुलपतिः इतरे च प्राध्यापकाः




सांस्कृतिककार्यक्रमस्य दृश्यमेकम्

## वायब्रण्ट-गुजरात - २०१९




शिक्षणमन्त्रिणा श्रीभूपेन्द्रसिंहचूडासमावर्येण सह कुलपतिः प्रो. गोपबन्धुमिश्रवर्यः

गुजरातसर्वकारेण प्रतिवर्षद्वयानन्तरं 'वायब्रण्ट-गुजरात-ग्लोबल्-समिट्' इत्याख्यः कश्चन अद्भुतकार्यक्रमः सगौरवं परिपाल्यते। तदनुसन्धाने अस्मिन्नपि हायने १७.०१.२०१९ तः २२.०१.२०१९ दिनाङ्कं यावत् अयं कार्यक्रमः गान्धिगनरे समायोजितः। अस्य कार्यक्रमस्य अङ्गतया विविधाः शैक्षिक-कार्यक्रमाः अपि समायोजिताः आसन्। एतेषु शैक्षिककार्यक्रमेषु अन्यतमा आसीत् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विशिष्टा प्रशंसनीया सर्वाङ्गीणविकासप्रस्तोत्री ज्ञानविज्ञानकलासाहित्य-प्रभृतिपुरस्कर्त्री प्रदर्शिनी।



शिक्षणमन्त्रिणं विश्वविद्यालयप्रदर्शिन्याः परिचयं कारयन् कुलसचिवः डॉ. दशरथ जादवः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतेः प्रो. गोपबन्धुमिश्रमहाभागस्य किञ्च कार्यकारिकुलसचिवस्य डॉ. दशरथजादवमहाभागस्य मार्गदर्शने समायोजिता इयं प्रदर्शिनी संस्कृतद्वारा सर्वाङ्गीणविकासं प्रदर्शयन्ती विद्वद्भिः संस्कृतानुरागिभिः अवलोकयितृभिश्च नितरां प्रशंसनीया आसीत्। अस्यां प्रदर्शिन्यां चित्ताकर्षकचित्रैः सह षोडशसंस्काराणाम्, अष्टादशपुराणानाम्, संस्कृतसाहित्ये प्रतिपादितवैज्ञानिकतत्त्वानाम्, ज्यौतिषशास्त्रस्य मौलिकतत्त्वानाम्, वेदेषूपलब्धवैज्ञानिकतथ्यानाम्, आर्षवाङ्मये निरूपितमूल्यबोधानाम्, न्यायवेदान्तादिविषयकसिद्धान्तानाम्, प्राचीनार्वाचीनज्ञानविज्ञानशैक्षिकविषयाणाम्, प्राचीनमातृकाविज्ञानस्य तत्साधनानाञ्च प्रदर्शनम् अत्यन्तं श्लाघ्यमासीत्। एतत्सर्वम् अवलोक्य आगताः जनाः विद्यार्थिनश्च नितरां प्रमुदिताः अभूवन्। गुजरातराज्यस्य माननीयशिक्षणमन्त्री श्रीभूपेन्द्रसिंह चुडासमा महोदयः, शिक्षणराज्यमन्त्रिमहोदया श्रीमती विभावरीबेनदवे, गुजरातसर्वकारस्य नैके अधिकारिणश्च इमां प्रदर्शिनीं वीक्ष्य नितरां प्रमुदिताः सन्तः प्रदर्शिनीनिर्मातृभ्यः नैकान् साधुवादान् समार्पयन्। गुजरातसर्वकारस्य मन्त्रिणः, उच्चाधिकारिणः, पाश्चात्त्यदेशेभ्यः समागता विद्वांसश्च इमां सरसां प्रदर्शिनीं संवीक्ष्य भूयो भूयः प्रशंसां विधाय लिखितरूपेण स्वमन्तव्येन अस्मान् प्राचूचुदन्। अस्याः प्रदर्शिन्याः संयोजने विश्वविद्यालयस्य प्राध्यापकानां कर्मचारिणां च महनीयं योगदानमासीत्। डॉ. कार्तिकपण्ड्या किञ्च श्रीहरेशखेरः अस्याः प्रदर्शिन्याः संयोजकौ आस्ताम्।

## सवैभवं समाचरितं ७०तमं गणतन्त्रपर्व



विश्वविद्यालयपरिसरे गणतन्त्रदिवसस्य किञ्चन दृश्यम्

भारतस्य गणतन्त्रं भारतस्य आत्मा वर्तते। अतः प्रतिवर्षमिव अस्मिन्नपि संवत्सरे श्रीसोमनाथसंस्कृतविश्वविद्यालये गणतन्त्रदिवसस्य आचरणं विश्वविद्यालयपरिसरे सोत्साहं समाचरितम्। अस्मिन् कार्यक्रमे अध्यक्षरूपेण मान्याः कुलपतयः उपस्थिताः भूत्वा ध्वजोत्तोलनमकार्षुः।

अत्रावसरे कार्यकारि-कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागस्य अध्यक्षा प्रो. अर्चनादुबे, प्रो. देवेन्द्रनाथपाण्डेयः, वेरावलजनपदस्य भारतीयजनतादलस्य उपप्रमुखः डॉ. जयेशभाई वघासिया, वेरावलनगर-वैद्यसङ्घस्य प्रमुखः डॉ. सञ्जयभाई परमारः, विश्वविद्यालयस्य सर्वेऽपि आचार्याः, उपाचार्याः, सहायकाचार्याः, अधिकारिणः, कर्मचारिणः, छात्राश्च उपस्थिताः आसन्। कार्यक्रमस्य आरम्भः ध्वजोत्तोलनेन सह सम्भूय राष्ट्रगानेन अभूत्। तदनु अध्यक्षत्वेन वदता श्रीमता कुलपतिना अभाणि यत् अस्माकं पूर्वजैः हुतात्मभिः अस्य देशस्य स्वतन्त्रता तु प्राप्ता परम् इदम् अस्माकं दायित्वं वर्तते यत् इदं राष्ट्रं वास्तविकरीत्या सुराष्ट्रं भवेत् तदर्थं सर्वैः नागरिकैः स्वकर्तव्यानि सुचारुतया अवश्यं पालनीयानि। माननीयकुलपतेः उद्बोधनानन्तरं छात्रैः भाषण-गीत-नाटक-योगाभ्यासादिकार्यक्रमाः समायोजिताः आसन्। अस्मिन् गणतन्त्रपर्वसमाचरणे एकमेतदपि वैशिष्ट्यमासीत् यत् कार्यक्रमान्ते विश्वविद्यालयस्य सर्वैः छात्राध्यापकाधिकारिकर्मचारिभिः पुष्पाञ्जलिसमर्पणपुरस्सरं भारतमातुः समर्चनम् अकारि। अस्य समग्रकार्यक्रमस्य सञ्चालनम् अनुस्नातकाध्यक्षायाः प्रो. अर्चनादुबेमहोदयायाः निर्देशने डॉ. जयेशमुंगरा अकरोत्।



विश्वविद्यालयपरिसरे उपस्थिताः प्राध्यापकाः छात्राः कर्मचारिणश्च



छात्रैः प्रदर्शितस्य सांस्कृतिककार्यक्रमस्य किञ्चन दृश्यम्



भारतमातुः पूजनम्


આધુનિક નગરમાં ભવ્યતા સાથે દિવ્યતા પણ હોવી જોઈએ : કુલપતિ

આધુનિક નગરમાં ભવ્યતાની સાથે દિવ્યતા પણ હોવી જોઇએ : સંસ્કૃત યુનિ. કુલપતિ

આધુનિક નગરમાં ભવ્યતાની સાથે દિવ્યતા પણ હોવી જોઈએ

શ્રીસોમનાથ સંસ્કૃતવિશ્વવિદ્યાલયે એકદિવસીયઃ સંસ્કૃતાધ્યાપન માર્ગદર્શન કાર્યક્રમઃ સમાયોજિતઃ

01-03-2019 sorath Bhaskar p. 2

વેરાવળમાં સોમનાથ સંસ્કૃત યુનિ. દ્વારા સંસ્કૃત પરિચય માટે સેમિનાર યોજાયો

સંસ્કૃત સાહિત્યમાં નગરરચના વિષય પર રાષ્ટ્રીય સંગોષ્ઠી યોજાઈ

સરદાર પટેલ યુનિવર્સિટીમાં બે દિવસ સુધી યોજાયેલી સંગોષ્ઠીમાં તજજ્ઞો ઉપસ્થિત રહ્યા

સરદાર પટેલ યુનિવર્સિટી ખાતે સંસ્કૃતિ સાહિત્ય નગર સંરચના સંગોષ્ઠિનું આયોજન

વિદ્યાનગર સ.પ. યુનિ.માં સંસ્કૃત સાહિત્ય નગર રચના અંગે બે દિવસીય સેમીનારનો પ્રારંભ

તા. ૬ અને ૭ માર્ચ ૨૦૧૯ના રોજ સરદાર પટેલ યુનિવર્સિટીના એમ.પી. પટેલ ઓડિટોરીયમ ખાતે બે દિવસની રાષ્ટ્રીય સંગોષ્ઠી કાર્યક્રમ યોજાયો

## वृत्तपत्रेषु श्रीसोमनाथसंस्कृतविश्वविद्यालयः


## चित्रवार्ता:




०६.०३.२०१९ दिनाङ्के विश्वविद्यालयपरिसरे आयोजितस्य 'न्यू इण्डिया चौपाल' इति कार्यक्रमस्य भावचित्रमेकम्



०९.०३.२०१९ दिनाङ्के 'दिल्ली पब्लिक लाइब्रेरी' संस्थायाः सदस्यानां विश्वविद्यालयपरिचयावसरे आयोजितस्य कार्यक्रमस्य दृश्यम्


१६.०३.२०१९ विश्वविद्यालयपरिसरे अन्तेवासिभिः आयोजितायाः क्रिकेटक्रीडायाः प्रारम्भे मान्यः कुलपतिः प्रो. गोपबन्धुमिश्रवर्यः छात्रैः सह


पूज्यगिरिबापूवर्यं विश्वविद्यालयस्य परिचयप्रदानपूर्वकं संस्कृतविकासाय शास्त्रसंरक्षणाय च क्रियमाणं गतिविधिं ज्ञापयन् मान्यः कुलपतिः प्रो. गोपबन्धुमिश्रवर्यः

## विश्वविद्यालये प्रदर्शितः 'परीक्षा-पे-चर्चा' इति कार्यक्रमः

माननीयप्रधानमन्त्रिणा २९.०१.२०१९ तमे दिनाङ्के परीक्षामुपलक्ष्य देशस्य सर्वे छात्राः 'परीक्षा-पे-चर्चा' इति कार्यक्रमस्य माध्यमेन सम्बोधिताः आसन्। यत्र माननीयप्रधानमन्त्रिणा श्रीमता नरेन्द्रमोदीमहोदयेन परीक्षापि कथम् आनन्ददायिनी भवितुमर्हतीति विषये मार्गदर्शनं प्रदत्तम्। कार्यक्रमोऽयं नवदेहल्यां समायोजितः आसीत् यस्य अन्तर्जालमाध्यमेन आभारतं प्रसारणं जातम्। अस्मिन् सन्दर्भे अयं कार्यक्रमः अन्तर्जालमाध्यमेन श्रीसोमनाथसंस्कृतविश्वविद्यालयेऽपि प्रदर्शितः यत्र विश्वविद्यालयस्य सर्वे छात्राः अध्यापकाश्च समुपातिष्ठन्।


प्रधानमन्त्रिणः परीक्षाविषयिणीं चर्चां शृण्वन्तः विश्वविद्यालयच्छात्राः प्राध्यापकाश्च

## काश्मीरे पुलवामा-आक्रमणे हुतात्मभ्यः सैनिकेभ्यः श्रद्धाञ्जलिसमर्पणकार्यक्रमः

१९.०२.२०१९ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये काश्मीरस्य पुलवामानगरे आतङ्कवादिभिः छलेन कृते आक्रमणे हुतात्मभ्यः वीरसैनिकेभ्यः श्रद्धाञ्जलिसमर्पणकार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य प्राध्यापकैः छात्रैः अधिकारिभिः कर्मचारिभिश्च एतेभ्यः हुतात्मसैनिकेभ्यः श्रद्धाञ्जलिः समर्पितः किञ्च तेषां चिरशान्त्यर्थं प्रार्थना कृता।


श्रद्धाञ्जलिं समर्पयन् डॉ. दशरथजादवः


हुतात्मभ्यः श्रद्धाञ्जलिं समर्पयन्तः छात्राध्यापकाः

## सम्पन्ना विद्यावारिधिकार्यशाला (Ph.D. Coursework)


विद्यावारिधिकार्यशालायां भागं ग्रहीतवद्भिः छात्रैः सह कुलपतिकुलसचिवौ

विश्वविद्यालयानुदानायोगस्य नियमानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०१८-१९ तमस्य शैक्षिकवर्षस्य कृते विद्यावारिधिप्रवेशपरीक्षायाः आयोजनं १६.०९.२०१८ दिनाङ्के अकारि। अस्यां परीक्षायां पञ्चदश शोधार्थिनः उत्तीर्णाः अभूवन् येषां कृते विश्वविद्यालयानुदानायोगनियमानुगुणं षष्टिहोरात्मिका विद्यावारिधिकार्यशाला श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे ०८.०२.२०१९ तः १७.०२.२०१९ यावत् समायोजिता। अस्यां कार्यशालायां द्वादश शोधचिकीर्षवः उपस्थिताः आसन्। अत्र विशिष्टवक्तृरूपेण प्रो. गोपबन्धुमिश्रः, प्रो. देवेन्द्रनाथपाण्डेयः, प्रो. विनोदकुमारझा, प्रो. अर्चनादुबे, प्रो. महेन्द्रकुमारदवे, डॉ. नरेन्द्रकुमारपण्ड्या, डॉ. पङ्कजरावलः, डॉ. शत्रुघ्नपाणिग्राही, डॉ. डी.एम. मोकरिया, डॉ. उमा महेश्वरी, डॉ. जानकीशरण आचार्यः, डॉ. दीपेश कतिरा, डॉ. कार्तिकपण्ड्या, डॉ. योगेश पटेलः, श्रीरवीन्द्रकाले, श्रीहरेशखेर च स्वविशिष्टव्याख्यानेन शोधविद्यार्थिनः उदबोधयन्। अस्याः कार्यशालायाः संयोजनं डॉ. कार्तिकपण्ड्या अकरोत्।


विद्यावारिधिकार्यशालायाः समापनसमारोहस्य किञ्चन दृश्यम्

## बी.एड्. छात्राणां कृते विश्वविद्यालयपरिचयकार्यक्रमः


विश्वविद्यालयपरिचयाय समागताः छात्राः

जूनागढस्थया डिस्ट्रिक्ट इन्स्टिट्यूट ओफ एड्युकेशन एण्ड ट्रेनिंग इत्यनया संस्थया समग्रगुजराते कार्यरतेषु डायेट-संस्थान्तर्गतेषु बी.एड्. महाविद्यालयेषु पठतां संस्कृतच्छात्राणां कार्यशाला काचिदायोजिता। कार्यशालायाः अस्याः अङ्गतया २०१९तमस्य वर्षस्य फरवरीमासस्य चतुर्थे दिने आयोजकसंस्थया उपषष्टिप्रतिभागिनां शैक्षणिक-प्रवासः श्रीसोमनाथसंस्कृतविश्वविद्यालयं प्रति आयोजितः। प्रतिभागिनः लोकयानेन प्रातः नववादने विश्वविद्यालयपरिसरं प्राप्ताः। अल्पाहारानन्तरं डॉ. दशरथ जादव महोदयः प्रतिभागिनः परिसरदर्शनाय अनयत्। ततः विश्वविद्यालयस्य मान्याः कुलपतिचरणाः सभागृहे सम्मिलितानां प्रतिभागिनाम् उद्बोधनमकुर्वन्। उद्बोधनान्तरं विश्वविद्यालये अध्ययनसन्दर्भे प्रतिभागिनां जिज्ञासासमाधानमकुर्वन्। कार्यक्रमान्ते प्रतिभागिभिः तन्मार्गदर्शकैश्च भावात्मकाः प्रतिभावाः प्रकटिताः। डॉ. दीपेश कतिरा कार्यक्रमस्यास्य संयोजनमकरोत्।


विश्वविद्यालयस्य परिचयं कारयन् डॉ. दशरथजादवः

## पञ्चदिवसीया NCERT राष्ट्रियकार्यशाला




कार्यशालायां भागं ग्रहीतवद्भिः महानुभावैः सह
कुलपतिः प्रो. गोपबन्धुमिश्रः कुलसचिवः डॉ. दशरथजादवश्च

राष्ट्रिय-शैक्षिक-अनुसन्धान एवं प्रशिक्षणपरिषत् (NCERT) किञ्च श्रीसोमनाथसंस्कृत-विश्वविद्यालयः इत्यनयोः संयुक्तोपक्रमे २५.०२.२०१९ तः ०१.०३.२०१९ यावत् A Compendium of Ancient Indian Educational Thoughts in Sanskrit इति विषयमादाय पञ्चदिवसात्मिका राष्ट्रिया कार्यशाला श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे समायोजिता आसीत्। विश्वविद्यालयस्य त्रिवेणीप्राशासनिकभवने २५.०२.२०१९ दिनाङ्के पूर्वाह्ले अस्याः उद्घाटनसत्रं प्रावर्तत। अस्मिन् उद्घाटनकार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः आध्यक्ष्यं निरवहत्। अस्याः कार्यशालायाः संयोजकरूपेण राष्ट्रिय-शैक्षिक-अनुसन्धान एवं प्रशिक्षणपरिषद्-नवदेहलीतः समागतः प्रो. यतीन्द्रमोहनमिश्रः विशिष्टातिथिपदे आसीत्। उद्घाटनकार्यक्रमेऽस्मिन् कार्यकारिकुलसचिवः डॉ. दशरथजादवः विशेषरूपेण उपस्थितः आसीत्।

कार्यशालायामस्यां विषयविशेषज्ञरूपेण विश्वभारती-शान्तिनिकेतनतः प्रो. अरुणरञ्जनमिश्रः, राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागपरिसरात् प्रो. बनमालीविश्वालः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, सौराष्ट्रविश्वविद्यालय-राजकोटतः प्रो. राजेन्द्रकुमार चोटलिया, महाराजासयाजीरावविश्वविद्यालय-वडोदरातः डॉ. श्वेता जेजुरकर, राष्ट्रियसंस्कृतसंस्थानस्य मुम्बैपरिसरतः डॉ. जीतेन्द्रकुमार राजगुरुः, डॉ. शत्रुघ्नपाणिग्राही, डॉ. कार्तिकपण्ड्या इत्यादिमहानुभावाः आसन्। कार्यशालायाम् एभिर्विद्वद्भिः पञ्चसु दिनेषु प्रातः दशवादनतः सायं सार्धपञ्चवादनं यावत् ७१७ संस्कृतसन्दर्भाणाम् आकलनम् अकारि। यत्र ३८२ संस्कृतसन्दर्भाणाम् आङ्ग्लानुवादः किञ्च ३३५ नूतनसंस्कृतसन्दर्भाणाम् आकलनम् आसीत्। अस्याः कार्यशालायाः समापनं ०१.०३.२०१९ दिनाङ्के त्रिवेणीप्राशासनिकभवनस्य सभागारे अवर्तत। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः आध्यक्ष्यं निरवहत्। प्रो. जतीन्द्रमोहनमिश्रः विशिष्टातिथिरूपेण किञ्च डॉ. दशरथजादवः विशेषरूपेण अस्याः कार्यशालायाः समापनसत्रे उपस्थितः आसीत्। अस्याः कार्यशालायाः स्थानीयसंयोजनं डॉ. कार्तिकपण्ड्या अकरोत्।

## एकदिवसीय-संस्कृतशिक्षकसम्मेलनम्

२५.०२.२०१९ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये गीरसोमनाथजूनागढजनपदयोः विभिन्नेषु माध्यमिकविद्यालयेषु महाविद्यालयेषु च अध्यापनरतानां संस्कृताध्यापकानां कृते एकदिवसीयं 'संस्कृत-अध्ययन-अध्यापन-विकासः' इत्याख्यं सम्मेलनम् आयोजितम्। अस्मिन् सम्मेलने अध्यक्षरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्र-महाभागः, मुख्यातिथिरूपेण भक्तकविनरसिंहमेहताविश्वविद्यालयस्य कुलपतिः प्रो. चेतनभाई त्रिवेदी, विशिष्टातिथिरूपेण गीरसोमनाथजनपदस्य शिक्षणाधिकारी श्रीकैलामहोदयः, जूनागढजनपदस्य शिक्षणाधिकारी श्रीमकवानामहोदयः च उपस्थितः आसीत्। अस्मिन् सम्मेलने गीरसोमनाथजूनागढजनपदयोः विभिन्नानां माध्यमिकविद्यालयानां महाविद्यालयानाञ्च पञ्चाशदधिकाः अध्यापकाः भागमगृह्णन्।




एकदिवसीयसङ्गोष्ठ्यां मञ्चस्थाः महानुभावाः

अस्मिन् सम्मेलने सर्वेभ्यः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सविस्तरं परिचयः, अत्र प्रचाल्यमानानाम् अभ्यासक्रमाणां विवरणं, विश्वविद्यालये अभ्यासरतानां छात्राणां च परिचयः प्रदत्तः। किञ्च संस्कृतभाषा सरलतया कथम् अधिगन्तुं शक्यते, कथं छात्राः अधिकाधिकं संस्कृताध्ययनं कुर्युः, संस्कृताध्ययनानन्तरं आजीविकायाः कृते के अवसराः वर्तन्ते इति विषये विशिष्टं मार्गदर्शनं प्रदत्तम्। अस्मिन् सम्मेलने डॉ. नरेन्द्रकुमारपण्ड्या, प्रो. अर्चनादुबे, डॉ. दीपेशकतिरा, डॉ. पङ्कजरावलः इत्यादिभिः अध्यापकैः उपस्थितानाम् अध्यापकानाम् मार्गदर्शनम् अकारि। अध्यक्षरूपेण वदता श्रीमता प्रो. गोपबन्धुमिश्रमहाभागेन अभाणि यत् विश्वविद्यालयस्तरे संस्कृतच्छात्राणां मूलं विद्यालयस्तरे अधीयानाः संस्कृतच्छात्राः सन्ति अतः अस्माभिः विद्यालयस्तरे छात्राः अधिकाधिकं संस्कृतं पठेयुः इति प्रयासः भवेत्। सम्मेलनान्ते कार्यकारिकुलसचिवः डॉ. दशरथजादवः सर्वेभ्यः धन्यतावचांसि अवादीत्। अस्य सम्मेलनस्य संयोजनं संस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या अकरोत्।

## समायोजिता विद्यावारिधिशोधचर्चासमितिः (R.D.C. of Ph.D.)



विश्वविद्यालयानुदानायोगस्य नियमानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०१८-१९ तमे शैक्षिकवर्षे विद्यावारिधिप्रवेशपरीक्षायाम् उत्तीर्णेभ्यः शोधच्छात्रेभ्यः ११.०३.२०१९ दिनाङ्के शोधचर्चासमितेः (Research Discussion Committee) आयोजनं कृतम्। विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः महाभागः समितौ आध्यक्ष्यं निरवहत्। जर्मनदेशस्थ-हैडलबर्ग-विश्वविद्यालयात् समागतः डॉ. आनन्दमिश्रमहाभागः विषयविशेषज्ञरूपेण उपस्थितः आसीत् किञ्च प्रो. देवेन्द्रनाथपाण्डेयः, प्रो. विनोदकुमार झा, डॉ. नरेन्द्रकुमारपण्ड्यादिप्राध्यापकाः विद्यावारिधिमार्गदर्शकरूपेण उपस्थिताः आसन्। अस्यां शोधचर्चासमितौ शोधार्थिभ्यः चितानां शोधविषयाणां प्रासङ्गिकता औचित्यम् उपयोगित्वम् इत्यादिविषयाणां चर्चा अभूत्।

## ‘संस्कृतशिक्षणम् अङ्कीयमानविकी च’ इत्यस्मिन् विषये समायोजिता विश्वविद्यालये विशिष्टा कार्यशाला



डॉ. आनन्दमिश्रवर्यं सभाजयन् कुलपतिवर्यः



कार्यशालायाः किञ्चन दृश्यम्

ऐषमः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन जर्मनीस्थेन विश्वविद्यालयद्वयेन समं शैक्षिकः अभिबन्धः कृतः। तत्र अन्यतमेन हैडल्बर्गविश्वविद्यालयेन सह जातस्य शैक्षिकाभिबन्धस्य अङ्गतया श्रीसोमनाथसंस्कृतविश्वविद्यालये २०१९ तमस्य वर्षस्य मार्चमासस्य एकादशात् दिनात् चतुर्दशं दिनं यावत् ‘संस्कृतशिक्षणम् अङ्कीयमानविकी च’ इत्यस्मिन् विषये विशिष्टा कार्यशाला समायोजिता। विश्वविद्यालयस्य मान्याः कुलपतिचरणाः काले काले कार्यशालायामुपस्थाय मार्गदर्शनमकुर्वन्। हैडल्बर्गविश्वविद्यालयस्य प्राध्यापकः डॉ. आनन्द मिश्र महोदयः अस्यां कार्यशालायामारम्भतः आन्तमुपस्थाय मार्गदर्शनमकरोत्। अस्यां कार्यशालायां विश्वविद्यालयपरिसरे पठन्तः षट् छात्राः, विश्वविद्यालयसम्बद्धमहाविद्यालयेभ्यश्च चत्वारः छात्राः, चत्वारः गुरवः, विश्वविद्यालयस्य ग्रन्थपालः, सङ्गणकाभियन्ता च भागमगृह्णन्। अस्याः कार्यशालायाः मुख्यसंयोजकः प्रो. विनोद कुमार झा संयोजकः च डॉ. दीपेश कतिरा आसीत्।

## द्वितीयः द्वादशज्योतिर्लिङ्गसमारोहः



विश्वविद्यालयपरिसरात् प्रवृत्तायाः शोभायात्रायाः किञ्चन दृश्यम्

द्वितीयद्वादशज्योतिर्लिङ्गसमारोहस्यायोजनं २३.०२.२०१९ तः दिवसत्रयं यावत् श्रीसोमनाथन्यासेन कृतमासीत्। तत्र प्रथमे दिवसे विविधेभ्यः ज्योतिर्लिङ्गेभ्यः समागतानां भक्तानां नागरिकाणां समुपस्थितौ श्रीसोमनाथ-न्यासस्य अध्यक्षवर्याणां श्रीमतां केशुभाई पटेल , श्री पी. के. लहेरी, श्रीविजयसिंह चावडा इत्यादिमहानुभावानां किञ्च, श्रीसोमनाथमन्दिरपरिवार-सदस्यानाम्, स्थानीयनागरिकाणां च उत्साहपूर्णवातावरणे कार्यक्रमोऽयं समारब्धः। प्रथमे दिने शोभायात्रायै सर्वेऽपि आगन्तुकाः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य परिसरं सम्प्राप्ताः यत्र द्वादशज्योतिर्लिङ्गानां प्रतिकृतयः सिद्धाः कृताः आसन्। तासां सर्वासां ज्योतिर्लिङ्गप्रतिकृतीनां समागतमहानुभावानां करकमलैः पूजनार्चनम् अक्रियत। अन्ते च एतस्मात् परिसरात् भव्यातिभव्यायाः अस्याः शोभायात्रायाः प्रारम्भो जातः, या च शोभायात्रा श्रीसोमनाथमन्दिरं प्रति गता।

## प्राध्यापकानां शास्त्रीयविचारविनिमयाय प्रवृत्ता वाक्यार्थपरिषद्




वाक्यार्थपरिषदः २०.०२.२०१९ दिनाङ्के प्रवृत्तस्य अधिवेशनस्य किञ्चन दृश्यम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षमिव अस्मिन्नपि वर्षे प्राध्यापकानां अधीतिबोधाचरणाय शास्त्रीयविचारविनिमयाय च वाक्यार्थपरिषत् प्रवृत्ता। अत्र विचारितविषयाणां शोधलेखानां च ‘वाक्यार्थज्योतिः’ इति नाम्ना प्रकाशनं भवति। परिषदः अस्याः प्रथममधिवेशनं गतवर्षस्य जुलैमासे तत्कालीनस्य कुलपतिमहोदयस्य प्रो. महेन्द्रकुमार दवे महाभागस्य आध्यक्ष्ये सम्पन्नम्। ततः प्रभृतिः प्रतिमासं विश्वविद्यालयस्य एकैकस्य वरीयसः प्राध्यापकस्याध्यक्ष्ये परिषदः एकैकमधिवेशनं सम्पन्नम्। शास्त्रीयविषयैः सममितिहासशरीरविज्ञानादि-विषयाः अपि परिषदः विभिन्नेषु अधिवेशनेषु चर्चिताः। प्रकृतवर्षस्य मार्चमासस्य अष्टमे दिने वर्तमानकुलपतेः प्रो. गोपबन्धु मिश्र महोदयस्य आध्यक्ष्ये परिषदः चरममधिवेशनं पूर्णतामगात्। डॉ. दीपेश कतिरा, श्रीनित्यानन्द ओझा च अस्मिन् वर्षे परिषदः संयोजकत्वमवहताम्।

## शैक्षणिकभवने समाचरितः सरस्वतीदेव्याः पूजनोत्सवः



सरस्वतीपूजनदिवसे यज्ञानुष्ठानरतः मान्यः कुलपतिवर्यः

१०.०२.२०१९ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवनपरिसरे छात्रैः सरस्वतीदेव्याः पूजनोत्सवः समाचरितः। प्रतिष्ठितसरस्वतीदेव्याः पूजनं हवनञ्च वैदिकरीत्या छात्रैः अध्यापकैश्च अक्रियत। तत्र कुलपतिमहोदयाः प्रो. गोपबन्धुमिश्रमहाभागाः सपरिवारं मुख्ययजमानरूपेण उपस्थिताः आसन्। पूजनावसरे छात्रैः सम्भूय श्रीसूक्तस्यापि पाठः विहितः। ‘भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा’ इति वचनं सार्थकं कर्तुं विश्वविद्यालयेन कार्यक्रमोऽयं सम्पादितः। किञ्च विश्वविद्यालयेन मान्यकुलपतेः मार्गदर्शनेन प्रेरणया च प्रतिमासं विश्वविद्यालयपरिसरे विद्यमानायां यज्ञशालायां यज्ञानुष्ठानं विधीयते, यत्र छात्राः प्राध्यापकाः इतरे च श्रद्धालवः भागं गृह्णन्ति।

## छात्राणां वाक्कौशलवर्धनाय प्रवृत्ता वाग्वर्धिनीपरिषत्

प्रतिवर्षमिव अस्मिन्नपि वर्षे छात्राणां वाक्कौशलवर्धनाय विश्वविद्यालये वाग्वर्धिनीपरिषदः सत्राणि प्रतिगुरुवासरमायोजितानि। प्रत्येकं सत्राय कश्चित् शास्त्रीयः विषयः पूर्वमेव निश्चीयते स्म। सर्वेऽपि छात्रवक्तारः तस्यैव विषयस्य विविधानि मुखानि मण्डयन्ति स्म। विषयानुगुणं तत्तच्छास्त्रे निपुणाः प्राध्यापकाः एकैकस्य सत्रस्य आध्यक्ष्यमवहन्। वाग्वर्धिनीपरिषदः २०१८-१९तमस्य शैक्षिकवर्षस्य अन्तिमं सत्रं मार्चमासस्य पञ्चविंशे दिने सम्पन्नम्। प्रो. देवेन्द्रनाथ पाण्डेयः सत्रस्यास्य आध्यक्ष्यमवहत्। सत्रेऽस्मिन् आवर्षम् उत्कृष्टभाषणानि कृतवद्भ्यः दशभ्यः छात्रेभ्यः प्रशस्तिपत्राणि वितीर्णानि। शास्त्रितृतीयवर्षे अधीयानः छात्रः केशवकुमारपाण्डेयः परिषदा सर्वोत्कृष्टच्छात्रप्रशस्तिं प्राप्नोत्। अस्मिन् वर्षे डॉ. बी. उमामहेश्वरी परिषदः अध्यक्षा, डॉ. दीपेश कतिरा, डॉ. शत्रुघ्न पाणिग्राही च संयोजकौ आस्ताम्।

## विश्वविद्यालय-प्रचारप्रसाराभियानम्

संस्कृतभाषा-साहित्य-दर्शनादीनां गभीराध्ययनाय गुजरातसर्वकारेण प्रतिष्ठापितेन श्रीसोमनाथसंस्कृतविश्वविद्यालयेन अत्यधिकाः संस्कृतजिज्ञासवः छात्राः लाभान्विताः स्युः इति धिया विश्वविद्यालयस्य प्राध्यापकैः छात्रसम्पर्काभियानमनुष्ठितम्। प्रो. अर्चना दुबे, प्रो. महेन्द्र दवे, डॉ. डी. एम. मोकरिया, डॉ. पङ्कज रावल, डॉ. दीपेश कतिरा च विश्वविद्यालयस्य प्रचारसाहित्यं नीत्वा जूनागढ-गीरसोमनाथ-जनपदयोः विभिन्नान् महाविद्यालयान् गत्वा छात्रैः सह अमिलन्। विश्वविद्यालये उपलब्धायाः संस्कृताध्ययनव्यवस्थाविषये उक्त्वा विश्वविद्यालये प्रचाल्यमानानां विभिन्नाभ्यासक्रमाणां विषये अवदन्। किञ्च संस्कृताध्ययनेन उद्योगावसराः कथं लभ्येरन् इत्यादिविषयेषु छात्रान् अबोधयन्। एतेन नैके छात्राः विश्वविद्यालयविषये ज्ञातवन्तः, अत्र अध्येतुं च ऐच्छन्।

## श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 'संस्कृतवाङ्मये नगरसंरचना' इति विषयमाश्रित्य समायोजिता राष्ट्रिया सङ्गोष्ठी

विद्वत्परिषत्-संस्कृतभारती-गुजरातम्, सरदारपटेलविश्वविद्यालय-वल्लभविद्यानगर, श्रीसोमनाथसंस्कृतविश्वविद्यालयः वेरावलं चेति तिसृभिः संस्थाभिः सम्भूय 'संस्कृतवाङ्मये नगररचना' इति विषयमाश्रित्य सङ्गोष्ठी समायोजिता। सङ्गोष्ठीयं ६-७ मार्च २०१९ दिनयोः सरदारपटेलविश्वविद्यालयस्य एम. पी. पटेल सभागृहे सम्पन्ना।


सङ्गोष्ठ्याः उद्घाटनावसरे मञ्चस्थाः महानुभावाः

संस्कृतसाहित्ये वास्तुशास्त्रसम्बद्धेषु मानसार-मयमत-समराङ्गणसूत्रधारादिषु ग्रन्थेषु नगररचनाविषये बहुविधा चर्चा समुपलभ्यते। वैदिकसाहित्ये संस्कृतकाव्यनाटकादिषु च नैकेषां नगराणां वर्णनानि उपलभ्यन्ते। धोलावीरा-लोथल-द्वारकादीनि प्राचीननगराणि उत्खननद्वारापि सम्प्राप्तानि सन्ति। उज्जैनी-अयोध्या-काशी-आदीनि पुरा संस्थापितानि नगराणि अद्यावधि वर्तमानानि सन्ति। सम्प्रति भारतसर्वकारद्वारा 'स्मार्ट-सिटी' निर्माण-सन्दर्भे नगररचनाविषयकविचारा हेया उपादेया वा इति विमर्शाय इयं सङ्गोष्ठी समायोजिता।

अस्याः सङ्गोष्ठ्याः उद्घाटनावसरे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्याः कुलपतयः प्रो. गोपबन्धुमिश्र-महोदयाः समुपस्थाय अयोध्यानगर्याः उदाहरणमुपास्थापयन्। तैः उक्तं यद् आधुनिकनगरेषु भव्यतया सह दिव्यता अपि भवेत्। बी.ए.पी.एस. स्वामिनारायणसंस्थायाः महामहोपाध्यायैः भद्रेशदासस्वामिभिः आशीर्वचनानि वदद्भिः नगरस्य लक्षणं लक्ष्यं च उपस्थाप्य काशी काचित् स्वयंसिद्धा नगरी वर्तते इति उक्तम्। सरदारपटेलविश्वविद्यालयस्य कुलपतिभिः प्रो. शिरीष कुलकर्णी महोदयैः धोलावीरानगरस्य उदाहरणमुक्त्वा तत्रत्यनागरिकाणां जीवनस्य विषये उक्तम्। नागपुरस्थायाः वी.एन.आय.टी इत्याख्यसंस्थायाः आचार्येण प्रो. अशोक सदाशिव नेने महोदयेन सरस्वतातिथित्वेन उपस्थाय महर्षेः भृगोः शिल्पसंहिता, मत्स्यपुराणम् इत्यादिग्रन्थानाम् उल्लेखं कृत्वा नगररचनाविषयकानुसन्धानस्य विषये सूचितम्। कार्यक्रमान्ते श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवेन डॉ. दशरथ जादव महोदयेन कृतज्ञताज्ञापनं कृतम्। समग्रस्यापि अस्य कार्यक्रमस्य सञ्चालनं संस्कृतभारत्या कार्यकर्त्रा डॉ. ललित पटेल महोदयेन कृतम्।


नगररचनासङ्गोष्ठ्याम् उपस्थितः श्रोतृगणः

दिनद्वयं निष्णातैः अनुसन्धातृभिः स्वीयाः विद्वत्तापूर्णाः प्रस्तुतयः कृताः। अधिकांशाः प्रस्तुतयः दृक्श्राव्यमाध्यमैः जाताः। प्रस्तुत्यन्ते श्रोतृभिः सह प्रश्नोत्तराणि अपि जातानि। प्रो. अशोक सदाशिव नेने महोदयेन शिल्प-स्थापत्य-नगररचनाविषयकाणां नैकेषां ग्रन्थानाम् अवलोकनेन यानि तथ्यानि संगृहीतानि तानि सान्द्रमुदिकामध्ये संस्थाप्य प्रतिभागिभ्यः वितीर्णानि। सङ्गोष्ठ्याः अस्याः अङ्गतया अष्टसु सत्रेषु दशभिः वक्तृभिः दशभिश्च सत्राध्यक्षैः नगरसंरचनासम्बन्धिनां विभिन्नानां विषयाणामुपस्थापनं कृतम्। आहत्य २१८ प्रतिभागिभिः अस्यां संगोष्ठ्यां भागः ऊढः।

षष्ठे दिनाङ्के सायं ८:०० तः ९:०० वादनं यावत् संस्कृतभाषया सांस्कृतिककार्यक्रमः आयोजितः आसीत्। कार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य विद्यार्थिभिः, संस्कृतभारत्या कार्यकर्तृभिः, सरदारपटेल-विश्वविद्यालयस्य अनुस्नातकविभागस्य विद्यार्थिभिः च संस्कृतेन रञ्जकाः कार्यक्रमाः प्रस्तुताः। सप्तमे दिनाङ्के सायं ४:४५ वादनतः ६:०० वादनं यावत् अस्याः सङ्गोष्ठ्याः सम्पूर्तिकार्यक्रमः आयोजितः आसीत्। राष्ट्रपतिपुरस्कारेण सम्मानितः विद्वान् डॉ. गौतम पटेल महोदयः कार्यक्रमेऽस्मिन् सारस्वतातिथित्वेन समुपस्थाय अहमदाबादनगरस्य वैशिष्ट्यानि समुपस्थापयत्। राष्ट्रपतिपुरस्कारेण सम्मानितः महर्षिपाणिनि संस्कृत एवं वैदिक विश्वविद्यालयस्य कुलपतचरैः प्रो. मिथिलाप्रसादत्रिपाठिमहाभागैः 'नगररचनासन्दर्भे दिशः, स्थापत्यानि, निवासव्यवस्था च' इति विषये स्वीयविचाराः समुपस्थापिताः। श्रीस्वामिनारायणसंस्कृतमहाविद्यालयस्य संस्थापकैः परमपूज्यैः पुरुषोत्तमप्रकाशदासस्वामिभिः आशीर्वचोभिः समं नैर्ऋत्यदिशः महत्त्वं बोधितम्। सरदारपटेलविश्वविद्यालयस्य कुलपतिभिः प्रो. शिरीष कुलकर्णी महोदयैः स्वीये आध्यक्षीये भाषणे प्रो. अशोक नेने महोदयेन कृतस्य अनुसन्धानस्य प्रशंसा कृता। एतादृशम् अनुसन्धानं कर्तुं तैः युवानः प्रेरिताः। अस्य कार्यक्रमस्य सञ्चालनं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राध्यापकेन डॉ. पङ्कज रावल महोदयेन कृतम्। समग्रायाः सङ्गोष्ठ्याः संयोजनं सङ्कलनं च संस्कृतभारत्याः कार्यकर्तृभिः कृतम्। स्थानीया व्यवस्था सरदारपटेलविश्वविद्यालयस्य आय. क्यु. ए. सी इति संस्थायाः अधिकारिभिः कृता। अस्यै सङ्गोष्ठ्यै आर्थिकव्यवस्था समग्रापि श्रीसोमनाथसंस्कृतविश्वविद्यालयेन कृता। तिसृणामपि संस्थानां पक्षतः क्रमशः प्रो. निरञ्जन पटेल महोदयेन, डॉ. ललित पटेल महोदयेन, डॉ. दीपेश कतिरा महोदयेन च सफलं संयोजनं कृतम्।

## श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडियादम्





- २६.१.२०१९ - अस्मिन् राष्ट्रियपर्वणि गणतन्त्रदिवसे ध्वजवन्दनं विद्यार्थिनां विविधाः कार्यक्रमाश्च अजायन्त। अयं राष्ट्रियोत्सवः पद्मश्री श्रीडाह्याभाई शास्त्रिवर्याणाम् उपस्थितौ सम्पन्नः।
- २६.२.२०१९ - महाविद्यालयस्य स्थापनादिनं वर्तते। अतः सर्वैः सम्भूय सारस्वतकर्मसिद्धये श्रीनर्मदेश्वरमहादेवमन्दिरे भगवदाराधनमक्रियत। मान्यैः श्रीडाह्याभाईशास्त्रिवर्यैः, डॉ. निरौलागुरुभिः, डॉ.अमृतलालभोगायतागुरुभिः, प्राध्यापकैश्च छात्रेभ्यः आशीः प्रदत्ता।
- ७.२.२०१९ - मान्यानां मोरारिबापुमहोदयानां कथाप्रसङ्गे ब्रह्मर्षिसंस्कृतमहाविद्यालये तेषां सन्निधौ एका कथागोष्ठी अजायत।
- ५.१२.२०१९ - पर्यावरणरक्षणाय वृक्षारोपणकार्यक्रमः श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयच्छात्रैः गुरुभिश्च सम्भूय अनुभावितः।
- १६.१.२०१९ - समग्रवर्षे ये छात्राः परीक्षासु स्पर्धासु च विजेतारः अजायन्त तेषां सर्वेषां सत्कारविधिः पद्मश्री श्रीडाह्याभाई शास्त्रिणां करकमलाभ्यां सम्पन्नः।
- १९.०३.२०१९ - परमपूज्यानां पद्मश्रीडाह्याभाईशास्त्रिणां जन्मदिवसमुपलक्ष्य ब्रह्मर्षिसंस्कृत-महाविद्यालयपरिवारेण शास्त्रिणां निरामयम् आयुष्यं परं दीर्घायुष्यं भवेत् तदर्थं मिलित्वा सर्वैः भगवतः शिवस्यार्चनं कुर्वद्भिः जन्मदिननिमित्तं शुभाशया समर्पिता।

## श्रीस्वामिनारायणसंस्कृतमहाविद्यालयः, डभाण



- २३.२.२०१९ - काश्मीरे पुलवामाक्षेत्रे फेब्रुवरीमासस्य चतुर्दशदिनाङ्के आतङ्कवादिभिः कृते आक्रमणे हुतात्मभ्यः वीरसैनिकेभ्यः श्रद्धाञ्जलिकार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे देशसेवायै हुतप्राणानां वीरसैनिकानां आत्मनः चिरशान्त्यर्थं श्रीलक्ष्मीनारायणदेवशिक्षणसेवाकेन्द्रस्य प्रमुखाः शास्त्रीश्रीशान्तिप्रियदासाः, श्रीस्वामिनारायणसंस्कृतमहाविद्यालयस्य प्राचार्यः शास्त्री श्रीमाधवस्वरूपदासः, अध्यापकाः, छात्राः, कर्मकराश्च श्रद्धाञ्जलिं दत्त्वा प्रार्थनां कृतवन्तः।

**महाविद्यालयवार्ताः**

## चन्द्रमौलिच्छात्रावासे संवर्धिताः वृक्षाः



छात्रावासपरिसरे संवर्धमानाः वृक्षाः

'वृक्षाः सत्पुरुषा इव' इत्युक्तिः मानवजीवने वृक्षाणां महत्त्वं द्योतयति। वृक्षाः पर्यावरणसंरक्षणाय किञ्च मानवस्वास्थ्यसम्पादनाय अत्यन्तं महत्त्वपूर्णं स्थानं भजन्ते। माननीयकुलपतेः प्रो. गोपबन्धुमिश्रमहाभागस्य प्रेरणया श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य चन्द्रमौलिबालकच्छात्रावासं परितः वृक्षाः रोपिताः, ये च इदानीं छात्राणाम् अध्यापकानाञ्च परिश्रमेण संवर्धमानाः दृश्यन्ते। भविष्यति एभिः वृक्षैः छात्रावासस्य परिसरः इतोऽपि रमणीयो भविष्यति।

## विश्वविद्यालये समारब्धः कश्चन अभिनवः स्वच्छताकार्यक्रमः



विश्वविद्यालयपरिसरे स्वच्छतां कुर्वन्तः अन्तेवासिनः

माननीयप्रधानमन्त्रिणः श्रीमतः नरेन्द्रमोदीमहोदयस्य 'स्वच्छं भारतम्' इति अभियानम् उररीकृत्य माननीयकुलपतेः प्रो. गोपबन्धुमिश्रमहोदयस्य मार्गदर्शने विश्वविद्यालयपरिसरस्य स्वच्छतायै कश्चन अभिनवः स्वच्छताकार्यक्रमः समारब्धः। यत्र विश्वविद्यालयस्य सर्वेऽधिकारिणः कर्मचारिणः प्राध्यापकाः छात्राश्च सम्भूय मासे वारद्वयं कार्यालयसमयानन्तरं स्वेच्छया समग्रस्य भवनस्य परिसरस्य च स्वच्छतां कुर्वन्ति। माननीयकुलपतेः मार्गनिर्देशने समारब्धोऽयं स्वच्छताकार्यक्रमः नितराम् अनुकरणीयो वर्तते।

# प्राध्यापकानाम् उपलब्धयः गतिविधयश्च

## प्रो. देवेन्द्रनाथ पाण्डेयः

- ४ तः ६ मार्च २०१९ यावत् महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानं किञ्च पट्टाभिरामशास्त्री-वेदविद्यालयः इति संस्थयोः संयुक्तोपक्रमे वाराणस्याम् आयोजिते अखिलभारतीयवैदिकसम्मेलने 'वैदिकभक्तितत्त्वम्' इति विषये व्याख्यानं प्रस्तुतम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालये ५-७ फरवरी २०१९ दिनाङ्केषु विश्वविद्यालयपरिसरे समायोजितायां राष्ट्रियसङ्गोष्ठ्यां सत्राध्यक्षकार्येण सह 'Life Management in Vedanta Philosophy' इति विषये शोधपत्रप्रस्तुतम्।
- ८.३.१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वाक्यार्थपरिषदि अध्यक्षरूपेणोपस्थितिः।
- १४.३.१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वाग्वर्धिनी-परिषदि आध्यक्ष्यं विहितम्।
- २५.२.२०१९ तः १.३.२०१९ दिनाङ्कं यावत् श्रीसोमनाथसंस्कृत-विश्वविद्यालये NCERT नवदेहली इति संस्थाद्वारा समायोजितायां कार्यशालायां भागग्रहणं कृतम्।

## प्रो. विनोद कुमार झा

- गुजरातराज्य-शाला-पाठ्यपुस्तकमण्डलेन गान्धीनगरे आयोजितायां पाठलेखन-समीक्षाकार्यशालायां मार्चमासस्य २६-२७ दिनाङ्कयोः भागमगृह्णात्।

## प्रो. अर्चना दुबे

- २६.०१.२०१९ दिनाङ्के विश्वविद्यालयपरिसरे आयोजितस्य गणतन्त्र-दिवसकार्यक्रमस्य मार्गदर्शनम्।
- ०५ तः ०७ फरवरी २०१९ पर्यन्तं विश्वविद्यालयपरिसरे दर्शनसङ्गोष्ठ्यां 'व्यवहारे सर्वे चार्वाकाः' इति विषये शोधपत्रं पठितम्।
- २५.०२.२०१९ दिनाङ्के विश्वविद्यालयपरिसरे 'संस्कृत-अध्ययन-अध्यापन-विकासः' इति कार्यक्रमे सत्राध्यक्षरूपेण कार्यं विहितम्।
- ०८ तः १७ फरवरी २०१९ पर्यन्तम् आयोजितायां विश्वविद्यालयस्य विद्यावारिधिकार्यशालायां साहित्यविषये व्याख्यानानि प्रदत्तानि।
- 'रसगङ्गाधर में ध्वनि के उदाहरणों में छन्दो-विमर्श' इति शोधपत्रस्य 'संस्कृति-सौरभम्' (ISSN 2249-829X) इति पत्रिकायां प्रकाशनम्।

## प्रो. महेन्द्रकुमार दवे

- ०१.०२.२०१९ दिनाङ्के सरदारपटेलविश्वविद्यालये 'कादम्बर्यां प्रणयनिरूपणम्' इति विषये विशिष्टव्याख्यानं दत्तम्। किञ्च तत्रैव विद्यावारिधिवाक्परीक्षायाम् उपस्थितिः।
- ०५ तः ०७ फरवरी २०१९ पर्यन्तं विश्वविद्यालये दर्शनसङ्गोष्ठ्यां 'स्वप्नवासवदत्ते दार्शनिकः सिद्धान्तः' इति विषये शोधपत्रं पठितम्।
- १८.०२.२०१९ दिनाङ्के हेमचन्द्राचार्य-उत्तरगुजरातविश्वविद्यालये एम्.फिल्.छात्राणां वाक्परीक्षायाम् उपस्थितिः।

## डॉ. डी. एम. मोकरिया

- २५.०१.२०१९ दिनाङ्के मतदानदिवसस्य आयोजनसन्दर्भे Best Sector Officer इति सम्मानपत्रं प्राप्तम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायां राष्ट्रियदर्शनसङ्गोष्ठ्याम् 'अभिज्ञानशाकुन्तले कर्मणः सिद्धान्तः' इति विषये शोधपत्रं प्रस्तुतम्।
- २८.०२.२०१९ दिनाङ्के कन्याविद्यालय-वेरावले 'संस्कृते आजीविका' इति विषये व्याख्यानं प्रदत्तम्।

## डॉ. शत्रुघ्न पाणिग्राही

- ५ तः ७ फरवरीं यावत् अखिलभारतीयदर्शनशास्त्रराष्ट्रियसंगोष्ठ्यां सत्रसञ्चालनेन सह 'वेदस्य अपौरुषेयत्वविचारः' इति शोधपत्रं प्रस्तुतम्।
- २५.२.२०१९ तः १.३.२०१९ दिनाङ्कं यावत् श्रीसोमनाथसंस्कृत-विश्वविद्यालये NCERT संस्थया आयोजितायां कार्यशालायां भागग्रहणम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालये फरवरी २०१९ मासे विद्यावारिधि-कार्यकालायां व्याख्यानानि प्रदत्तानि।
- १०.०२.२०१९ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे आयोजितस्य सरस्वतीदेव्याः पूजनोत्सवकार्यक्रमस्य संयोजनं कृतम्।
- १८.१.१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वाग्वर्धिनीपरिषदि आध्यक्ष्यं विहितम्।

## डॉ. जयेश मुंगरा

- श्रीसोमनाथसंस्कृतविश्वविद्यालये ०५ तः ०७ फरवरी पर्यन्तं दर्शनसङ्गोष्ठ्यां 'योगदर्शन के अनुसार षट्कर्म निरूपण' इति विषये शोधपत्रं प्रस्तुतम्।
- २६.०१.२०१९ दिनाङ्के विश्वविद्यालये गणतन्त्रदिवसस्य संयोजनं कृतम्।
- शोधपत्रप्रकाशनम् - Stress Management Through Yoga - Research Journal - February-2019 (ISSN 2348-7143)
- Analytical Study on Physical Fitness of Vollyball Players and Kabaddi Players in SSSU - Research Journal - January- 2019 (ISSN 2348-7143)

## डॉ. जानकीशरण आचार्यः

- श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ०५ तः ०७ फरवरी २०१९ पर्यन्तम् आयोजितायां राष्ट्रियदर्शनसङ्गोष्ठ्याम् 'अद्वैतवेदान्ते मातृकाग्रन्थाः कैवल्यदीपिका च' इति विषये शोधपत्रं प्रास्तौत्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ०८ तः १७ फरवरी २०१९ पर्यन्तम् आयोजिते विद्यावारिधि-कोर्सवर्क-कार्यक्रमे आमन्त्रितव्याख्यातृरूपेण 'भारतीयदर्शनेषु संशोधनपद्धतिः', 'मातृकाग्रन्थसम्पादनविधिः' इत्यादिविषयेषु व्याख्यानानि प्रादात्।
- गुजरात-शाला-पाठ्यपुस्तकमण्डलम् इति सर्वकारीयनिकायेन गान्धीनगरे आयोजितायां पाठलेखन-पुनरीक्षणकार्यशालायां भागमगृह्णात्।
- २०.२.२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदि 'भूमाधिकरणविचारः' इति विषये वाक्यार्थविचारं प्रास्तौत्।
- ११ तः १४ फरवरी २०१९ पर्यन्तम् श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायां 'संस्कृताध्ययनम् अङ्गीयमानविकी च' इति कार्याशालायां भागमगृह्णात्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य 'सोमज्योतिः' इति वार्तापत्रस्य १७-१८ संयुक्ताङ्कस्य सम्पादनमकरोत्।

## डॉ. बी. उमा महेश्वरी

- श्रीसोमनाथसंस्कृतविश्वविद्यालये ५ तः ७ फरवरी २०१९ दिनाङ्केषु अखिलभारतीयदर्शनशास्त्रीयराष्ट्रियसङ्गोष्ठयाः संयोजकत्वं विधाय तत्रैव 'आधुनिक परिप्रेक्ष्ये कालः - एकं चिन्तनम्' इति विषये व्याख्यानं प्रदत्तम्।
- ८.३.२०१९ दिनाङ्के विश्वविद्यालयपरिसरे आयोजितायां वाक्यार्थपरिषदि 'दर्शनेषु अपवर्गविचारः' इति विषये व्याख्यानं कृतम्।
- शोधपत्रप्रकाशनम् - देवसायुज्यम् (ISSN 2321-1342) 'न्यायशास्त्रे निःश्रेयसाधिगमः - एकमालोचनम्'।

### डॉ. पङ्कज रावल:

- 'सोमज्योतिः' इति वार्तापत्रस्य १६तमस्य अङ्कस्य सम्पादनम्।
- विश्वविद्यालये ०५ तः ०७ फरवरी २०१९ पर्यन्तम् आयोजितायां दर्शनसङ्गोष्ठ्यां 'श्रीमद्भागवतमहापुराणस्य तृतीयेकादशस्कन्धयोः अध्यात्मदर्शनम्' इति शीर्षकेण शोधपत्रं प्रस्तुत्य सत्रसञ्चालनमपि अकरोत्। किञ्च अत्रैव कविसम्मेलने कवित्वेन भागमग्रहीत्।
- ०८ तः १७ फरवरी २०१९ पर्यन्तम् आयोजिते विद्यावारिधि-कोर्सवर्क-कार्यक्रमे चत्वारि व्याख्यानानि प्रादात्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वाक्यार्थपरिषदि शोधपत्रं प्रास्तौत्।
- ३.३.२०१९ दिनाङ्के कर्णावत्याम् आयोजिते स्वामिनारायण-सम्प्रदायस्य परिसंवादे 'श्रीमद्भागवतमहापुराणे योगदर्शनम्' इति विषये शोधपत्रं प्रास्तौत्।
- बाबासाहेब-आम्बेडकर-मुक्तविश्वविद्यालये अखिलभारतीय-प्राच्यविद्यासङ्गोष्ठ्यां निमन्त्रितातिथिरूपेण सत्राध्यक्षत्वं निरवहत्।

### डॉ. कार्तिकपण्ड्या (संशोधनाधिकारी)

- ऑल-इण्डिया-सर्वे-ओन्-हायर्-एज्युकेशन् (२०१८-१९) कृते विश्वविद्यालयस्य नोडल-अधिकारिरूपेण कार्यं व्यधायि। अत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयः गुजरातराज्ये प्रथमं स्थानं प्राप्नोत्।
- १७ तः २२ जनवरी २०१९ पर्यन्तं वायब्रण्ट-गुजरात-ग्लोबल्-समिट्-२०१९ इति कार्यक्रमे विश्वविद्यालयस्य प्रदर्शिन्याः संयोजकत्वं विहितम्।
- ०८ तः १७ फरवरी २०१९ यावत् समायोजितायाः विद्यावारिधि-कार्यशालायाः संयोजकत्वं विधाय तत्रैव षड् व्याख्यानानि प्रदत्तानि।
- विश्वविद्यालयस्य चतुर्णां पुस्तकानां प्रकाशने समन्वयरूपेण कार्यमकारि।
- २५.०२.२०१९ तः ०१.०३.२०१९ यावत् विश्वविद्यालयपरिसरे समायोजितायाः Ancient Indian Educational Thoughts in Sanskrit कार्यशालायाः स्थानीयसंयोजकत्वं विधाय तत्र भागग्रहणम्।
- ११.०३.२०१९ तमे दिनाङ्के आयोजितायाः विश्वविद्यालयस्य शोधचर्चासमित्याः संयोजकत्वं विहितम्।

## ऐषमः विश्वविद्यालये आरब्धं 'फिल्मक्लब्' छात्रप्रियतामाप्नोत्

वर्तमानात् शैक्षिकवर्षात् विश्वविद्यालये फिल्मक्लब् समारब्धम्। फिल्मक्लबद्वारा प्रतिशनिवासरं सायं पञ्चवादनादूर्ध्वं किञ्चित् मोदबोधदं प्रेरकं वा चलच्चित्रं छात्रेभ्यः प्रदर्श्यते। प्राप्ते समये चलच्चित्रान्ते तत्सम्बन्धिनी चर्चापि छात्रेषु प्रवर्त्यते। राष्ट्रियचरित्रनिर्माणाय स्नेह-सेवा-सौहार्द-परोपकारादि-गुणानां छात्रेषु विकासाय च प्रकल्पितः अयं रञ्जकः उपक्रमः क्षिप्रं छात्रप्रियतामाप्नोत्। अस्मिन् उपक्रमे छात्रेभ्यः लघुचलचित्रादिकमपि प्रदर्श्यते येन छात्रेषु सेवादिगुणानां विकासः भवेत्। वर्तमानसत्रस्य फिल्मक्लब् इत्यस्य अन्तिमे अधिवेशने 'स्वदेश' इत्यस्य चलच्चित्रस्य प्रदर्शनं जातम्। इदं चलच्चित्रं जन्मभूम्या सह मनुष्यस्य सहजं भावबन्धं प्रकटयति। डॉ. दीपेश कतिरा अस्य उपक्रमस्य संयोजकः अस्ति। निखिल-व्यासः परिन-जोषी चेति उभौ छात्रौ अस्य संचालने उल्लेखनीयं साहाय्यं कुरुतः।

## चन्द्रमौलिबालकच्छात्रावासे प्राध्यापकानां प्रार्थनाकालीनं मार्गदर्शनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य चन्द्रमौलिबालकच्छात्रावासे निवसताम् अन्तेवासिनां न केवलं वर्गे सम्यगध्यापनं भवेत् परं विश्वविद्यालयसमयानन्तरमपि विभिन्नेषु विषयेषु ते मार्गदर्शनं प्राप्नुयुः किञ्च तेषां सहजप्रतिभा विकसेत् तदर्थं मान्यकुलपतेः प्रो. गोपबन्धुमिश्रस्य प्रेरणया मार्गदर्शने च क्रमशः सर्वे प्राध्यापकाः प्रतिदिनं रात्रौ प्रार्थनासमये चन्द्रमौलिच्छात्रावासं गत्वा न्याय-वेदान्त-व्याकरण-साहित्य-च्छन्दो-विज्ञान-नाटकादिविषयान् बोधयन्ति। किञ्च एतैः छात्राणां वैयक्तिकमार्ग-दर्शनमपि क्रियते येन छात्राणां नृत्यसङ्गीतकलागद्यपद्यरचनादिविषये सहजा प्रतिभा विकसिता भवति। अस्य छात्रमार्गदर्शनकार्यक्रमस्य इदं वैशिष्ट्यमस्ति यत् अयं मान्यकुलपतेः प्रेरणया समारब्धः, किञ्च मान्यकुलपतयः प्रो. गोपबन्धुमिश्राः अपि स्वयं छात्रावासम् आगत्य छात्राणां मार्गदर्शनं कुर्वन्ति।

## अभिनन्दनानि



प्रो. महेन्द्रकुमार दवे

(AGP 9000 to AGP 10000)

श्रीसोमनाथसंस्कृतविश्वविद्यालये किञ्च विश्वविद्यालयसञ्चालित-संस्कृतमहाविद्यालये अध्यापनरताः अधोलिखिताः प्राध्यापकाः विश्वविद्यालयानुदानायोगस्य नियमानुसारं Career Advancement Scheme माध्यमेन प्रोन्नतिं प्राप्तवन्तः। तदर्थं विश्वविद्यालय-परिवारपक्षतः 'सोमज्योतिः' सम्पादकमण्डलपक्षतश्च एतेभ्यः शुभकामनापुरस्सरं नैकानि अभिनन्दनानि वितीर्यन्ते।



डॉ. डायालाल मोकरिया



डॉ. शत्रुघ्न पाणिगाही



डॉ. पङ्कजकुमार रावल



डॉ. रमेशचन्द्र शुक्लः

(AGP 6000 to AGP 7000)

गुजरातसर्वकारेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विद्यापरिषदि (Academic Council) नवनियुक्तानां सदस्यानां श्रीसोमनाथसंस्कृत-विश्वविद्यालयपरिवारः हार्दं स्वागतं व्याहरति।

1. **Dr. Maheshkumar H.Thakar**
   Shree Thakur H.L.Danthi B.K.Vaidik Sanskrit Mahavidhyalay,
   Kadiyadara, Ider, Dist-Sabarkantha, Pin-383440.
2. **Shree Ashok Someshwar Joshi**
   Shandilya Rushi Ved Sanskrit Pathshala,
   Badrinarayan Temple, Adajan, Surat.
3. **Smt. Soniya Chirag Patel**
   D-104, Kesar Harmony, Sahjanand Party Plot Road,
   Nr.Gangotri Circle, Nikol, Ring Road, Ahmedabad.
4. **Dr. Rajesh Chunilal Vyas**
   *Associate Professor,* S.P.T. Arts & Science College,
   At-Godhara, Dist-Panchmahal, Pin-389001.
5. **Prof. Shrinivas Varkhedi**
   *Vice Chancellor,* Kavi Kulguru Kalidas Saskrit University,
   Nagpur-440012 Maharashtra

गुजरातराज्ये, पुण्ये प्रभासक्षेत्रे, सोमनाथ–ज्योतिर्लिङ्ग–सान्निध्ये
संस्कृत–शास्त्र–वेद–अध्ययनस्य सुवर्णावसरः

# श्रीसोमनाथसंस्कृतविश्वविद्यालयः

## प्रमुखाः पाठ्यक्रमाः

* शास्त्री (B. A.) * आचार्यः (M. A.) * तत्त्वाचार्यः (M.Phil.) * विद्यावारिधिः (Ph.D.) *
विषयाः– वेदः, व्याकरणम्, सर्वदर्शनम्, ज्यौतिषम्, साहित्यम्, पुराणम्, योगः(M. A.)

* पदविका (डिप्लोमा) *
विषयाः– टेम्पल–मेनेजमेन्ट, पौरोहित्यम्, वास्तुशास्त्रम्, ज्यौतिषम्, संस्कृत–टीचिंग, शास्त्रीयसङ्गीतम्, वैदिकगणितम्, योगः

## विशेषाः

* मुख्य–पाठ्यक्रमेण सह एव डिप्लोमापाठ्यक्रमे अपि प्रवेशः * राज्यस्तरीय–राष्ट्रस्तरीय–क्रीडा–स्पर्धासु भागग्रहणस्य अवसरः *
* पारम्परिकविषयैः सह आधुनिकविषयाणामपि अध्यापनम् * संस्कृतसम्भाषणस्य संस्कृतलेखनस्य च विशेषप्रशिक्षणम् *
* मुख्यपाठ्यक्रमेण सह आधुनिकविषयाणाम् अपि अध्यापनम् *
* UGC NET/SLET इत्यादि–स्पर्धात्मक–परीक्षाः अनुलक्ष्य विशेष–प्रशिक्षणस्य निःशुल्कव्यवस्था *

## विश्वविद्यालये विद्यार्थिनां जीवनम्

* छात्राणां वक्तृत्व–प्रतिभा–विकासाय 'वाग्वर्धिनी–परिषत्' * तज्ज्ञैः शिक्षकैः छात्राणां व्यक्तिगत–परामर्शः *
* राष्ट्रिय–सेवा–योजना, स्वच्छता–अभियानानि, वीथिनाटकानि, वृक्षारोपणम् इत्यादिभिः छात्रेषु राष्ट्रिय–चरित्र–निर्माणम् *
* सर्वजातीय–च्छात्राणाम् एकत्र–निवासेन समरसता–भावस्य जागरणम् *
* शास्त्रीय–सांस्कृतिक–चित्र–क्रीडादिषु रुचि–निर्माणाय प्रतिवर्षं विश्वविद्यालयद्वारा युव–महोत्सवस्य आयोजनम् *
* आयोजन–कौशलम्, नेतृत्व, सभाधैर्यम् इत्यादीनां प्रतिभानां विकासाय छात्रद्वारा एव वार्षिक–महोत्सवस्य आयोजनम् *
* पदवीदानसमारोह–निमित्तेन प्रतिवर्षं परिसरे राज्यपालानां, शिक्षणमन्त्रिणाम्, सारस्वत–अतिथीनां च परिसरे उपस्थितिः मार्गदर्शनं च *
* स्वशास्त्रे नैपुण्य–सम्पादनाय राष्ट्रिय–विदुषां मार्गदर्शने पृथक्–पृथक् शास्त्रीय–कार्यशालानाम् आयोजनम् *
* काले काले प्रेरक–चलचित्राणां 'फिल्म–क्लब' माध्यमेन प्रदर्शनम् *
* विश्वविद्यालयस्य ग्रन्थालये छात्राणां कृते 'Earn While You Learn' योजनायां धन–अर्जनस्य अवसरः *
* छात्रावासे प्रतिदिनं ग्रन्थ–पारायणम्, श्लोक–रचना, गद्य–लेखनम् इत्यादीनां शिक्षणम् * नित्यः यज्ञ–अनुष्ठानम् *

## सुविधाः

*** निःशुल्क–भोजन–व्यवस्था * निःशुल्क–आवास–व्यवस्था * अद्यतन–ग्रन्थालयः ***
*** अद्यतन–सङ्गणक–प्रयोगशाला * आधुनिक–यन्त्रैः युक्ता व्यायामशाला ***

## प्रवेशाय सम्पर्कं कुर्वन्तु


**प्रो. अर्चनाकुमारी दुबे**
अध्यक्षा, अनुस्नातकविभागस्य
९५५८८७९८२१

**डॉ. नरेन्द्रकुमार पण्ड्या**
प्राचार्यः, संस्कृतमहाविद्यालयस्य
९८९८५४०४०३

**डॉ. दीपेश कतिरा**
अध्यापकः
९५९४३ ५६८५७

कार्यालयः – ०२८७६–२४४५३२
website: www.sssu.ac.in E-mail: sssu.veraval@gmail.com